पञ्चब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त च । ग्रथित्वा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत् ॥ रु.जा.उ,



epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

पंचम खण्ड

रुद्राक्ष-उपचार-महिमा :-



"रुद्राक्षमम्लमुष्णं च वातघ्नं कफनाशनम् ।
शिरोर्तिशमनं रुच्यं भूतग्रहविनाशनम् ॥"

अर्थात् धन्वन्तरीराज निघण्टु अनुसार रुद्राक्षको फल अम्ल, उष्ण, वातघ्न (वायु नाशक) कफनाशक, शिरदर्दनाशक, रुचिवर्धक, भूत-प्रेतवाधानाशक र ग्रहजनितपीडा विनाशक हुन्छ, भनिएको छ । रुद्राक्षको दाना द्वारा हृदयरोग, धेरै या थोरै रक्तचाप, उदर–पेटसम्वन्धी विकार, अन्यमनस्कता, विक्षिप्त मानसिकता, पागलपन आदिको उपचार गरिन्छ । आयुर्वेद, चरक संहिता एवं निघण्टु आदि ग्रन्थमा रुद्राक्षको उपचार विधिकोवारेमा वर्णन गरिएको पाइन्छ । यसै प्रसंगमा आचार्य प्रियवत शर्माको आयुर्वेदीय-ग्रन्थ द्रव्यगुण-विज्ञानमा समेत रुद्राक्ष सम्वन्धि उपचारबारे वर्णन यसरी गरेको पाइन्छ -

रुद्राक्षस्य फलास्थिस्यान्मधुरं शीतलं लघु । मनोविकारशमनं रक्तभारापहं सरम् ॥
दाहज्वरप्रशमनं शस्यते वातपैत्तिके । अपस्मारे तथोन्मादे रक्तभारेऽधिके तृषि ॥
मसूरिकायां विस्फोटे श्वासे यकृत्गदेसु च ॥ (प्रियवत शर्मा-द्रव्यगुण विज्ञान)

अर्थात् रुद्राक्षको फल वोक्रा र भित्री गुदीले वात-कफ-पित्त र मानसिक रोगको नाश गर्दछ भने ज्वरशान्ति, अपस्मार(मूर्छा), मिर्गी, रक्त उच्चता, ठेउला, विफर, श्वास-प्रश्वास एवं कलेजो सम्वन्धी रोगको उपचारमा समेत उपयोगी हुन्छ । यद्यपि प्राचीनकालमा धार्मिक व्यक्तिहरु रुद्राक्षको बारेमा यस्तो धारणा राख्दथे । रुद्राक्ष साक्षात् भगवान् शिवको अंश हो । यसलाई काट्नु, फोर्नु, घोट्नु, डढाउनु र यसको भस्म तयार गरी प्रयोगमा ल्याउनु हुदै, यसो गर्दा पाप लाग्छ-इत्यादि आफ्नो धारणा व्यक्त गर्ने गर्दथे । तर क्रमशः यसको वारेमा अध्ययन र अनुसन्धान हुदै गए र यसवाट अनेकौं असाध्यरोगहरु समेत ठीक हुदा रहेछन् भन्ने कुरा यसको प्रयोगवाट आयुर्वेदीय ग्रन्थका रचयिताहरुले जाने र त्यसलाई विभिन्न आयुर्वेदका ग्रन्थमा लिपिबद्ध समेत गरे । जसको आधारमा रुद्राक्ष-अम्ल भएकाले रक्तवर्धक, रक्तशोधक एवं भिटामिन 'सी'ले युक्त भएको, उष्णतायुक्त भएकोले सर्दी एवं कफवाट उत्पन्न बाधा शान्तगर्ने, वातघ्न-वायुनाशक भएकोले सवै प्रकारका वाथरोग, गठिया आदि रोगको शमन गर्ने तथा टि.वी., गोष्टिक, युरिकेसिड् आदि रोगको उपचारमा समेत लाभदायक भएको ठहर गरे । यसको अतिरिक्त रुद्राक्ष स्नायुदौर्वल्य, हृदयरोग, मस्तिकविकार, विषव्रण-कैन्सर तथा सेप्टिक आदिको उपचारमा पनि अझैं लाभदायक मानिन्छ । तर यसमा अझै वढी खोज र वैज्ञानिक प्रयोगको आवश्यकता रहेको देखिन्छ । किनकि अहिले पनि यस क्षेत्रमा लागेका विभिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

डाक्टर, वैद्यहरुको समेत यस तर्फ विशेष रूपमा ध्यान आकृष्ट हुन सकेको देखिदैन । जति जानकारी छ त्यसमा नै चित्त बुझाएको देखिन्छ । जसलाई उपयुक्त (ठीक) मान्न सकिदैन । जसमा धार्मिक भावनाका साथ प्रयोगात्मक उपचार पद्धतिको विस्तृत अनुसन्धान/गोष्ठी आदिको अत्यधिक खाचो देखिन्छ। यसै क्रममा धन्वन्तरिराज निघण्टुमा रुद्राक्षका अनेक नाम उल्लेख गरिएका पाइन्छन्। जो यस प्रकार छन्- रुद्राक्षश्च शिवाक्षश्च सर्वाक्षो भूतनाशन : । पावनो नीलकण्ठाक्षो हराक्षश्च शिवः प्रिय : ॥ अर्थात् रुद्राक्ष, शिवाक्ष, सर्वाक्ष, भूतनाशन, पावन, नीलकण्ठाक्ष, हराक्ष, शिवप्रिय आदि, उक्त रुद्राक्षका पर्यायवाची शव्द मानिएका छन् । यसको अतिरिक्त रुद्राक्षलाई 'शिवविन्दु' पनि भन्ने गरिन्छ । यसै प्रसंगमा नेपाली, हिन्दी, संस्कृत, वंगाली र पंजावी भाषामा यसलाई रुद्राक्ष भनिन्छ । तमिल, तेलगू र कन्नड भाषामा रुद्राक्षकोटि, अंग्रेजीमा Utransum Bead अट्रासमवेड र लेटिन भाषामा Elaeocarpus Ganitrus Roxb इलाओकार्पस् गनिट्रस रोव भन्ने गरिन्छ ।

रुद्राक्षको फल वोक्रा दुवै उपयोगी हुन्छन् । किनकि रुद्राक्षको वोक्रा सन्धिवाथ, सवै पित्तसम्वन्धी विकार र निमोनिया आदि रोगमा अत्यधिक उपयोगी हुन्छ । यसैगरी रुद्राक्षको काँचो फललाई कुटी त्यसको घोल वनाई, सर्पले टोकेका व्यक्तिको घाउमा (रुद्राक्षको) लेप लगाई, पिलाएमा त्यस रोगीले उल्टी गर्दछ र त्यो रोगी वमन गरेकाले वाच्न सफल हुन्छ । रुद्राक्षभस्म-हैजा, दम (दमा) आदिमा उपयोगी हुन्छ, इत्यादि कुरा वैद्य-कविराजहरुको प्रयोग एवं अनुभववाट सिद्ध भैसकेको छ ।

यद्यपि यस पृथिवीतलमा उत्पन्न भएका यावत् वनस्पतिहरु औषधी हुन् तर रुद्राक्ष महौषधी हो । यसको प्रयोग गर्न जान्ने व्यक्तिले सवै रोग निको पार्न सक्तछ । यसै प्रसंगमा भनिएको छ -

"अमन्त्रं अक्षरं नास्ति नास्ति मूलमनौषधम् । अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः"

अर्थात् सवै अक्षर मन्त्ररूप हुन्छन् । सवै वनस्पतिहरु औषधी हुन् । कुनै पुरुष-प्रयोगकर्ता अयोग्य हुदैन । तर राम्रो व्यवस्थापक भएमा अयोग्य व्यक्ति पनि योग्य हुन सक्दछ । यसकारण रुद्राक्ष सम्वन्धी विस्तृत अन्वेषण भएमा एवं यसको धार्मिक महिमा र उपचार विधिको व्यापक एवं व्यवस्थित प्रचार-प्रसार भएमा सबै रोग यसै शिवविन्दुवाट नै निर्मूल गर्न सकिन्छ । यसरी उक्त विषय वस्तु विचार गरी रुद्राक्षको धार्मिक एवं प्रयोगात्मक उपचारविधिवारे केही दिग्दर्शन निम्न वमोजिम गरिएको छ । जसमा सर्व प्रथम १ देखि १४ मुखि पर्यन्त रुद्राक्षको धारणमहत्त्व र उपचारविधि धार्मिक दृष्टिकोण अनुरूप यस प्रकार रहेको छ -

क) एकमुखी रुद्राक्ष :- जो संस्कार पूर्वक धारण गरिन्छ । यसमा धार्मिक दृष्टिकोण अनुसार सर्वमनोरथ सिद्धि, व्यक्तिको दुःख नाश गर्ने शक्तिका साथै समृद्धि, मान प्रतिष्ठा आदिको प्राप्ति गराउने शक्ति हुन्छ । यसको धारणले ऋद्धि सिद्धि समेत प्राप्त हुन्छ ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: M

ख) <u>द्विमुखी रुद्राक्ष</u> :- कुण्डलिनी जागरण, वशीकरण प्रक्रियाका लागि अचूक अस्त्र मानिन्छ । तर यसलाई वैदिक विधान अनुरूप शुद्ध भई धारण गर्नु पर्दछ । यसलाई घोटी लगाउनाले नासूर (नाडीव्रण) आदि रोग शान्त हुन्छ ।

ग) <u>त्रिमुखी रुद्राक्ष</u> :- २ या ३ दिन बिराएर आउने जरोको शान्तिका लागि उ ी मानिन्छ । यसका लागि अभिमन्त्रित रुद्राक्ष रोगीको शिरमा स्पर्श गर. दाहिने हाथमा बाँधी दिनु पर्दछ ।

घ) <u>चतुर्मुखी रुद्राक्ष</u> :- धारण गर्नाले मन्दबुद्धि, वाक्‌शक्तिको कमजोरी, स्मरणशक्तिमा आएको ह्रास हटाउँदछ । यो सम्मोहन तथा वशीकरण विधिका लागि पनि उपयोगी मानिन्छ । यसको अतिरिक्त उक्तमुखी रुद्राक्षलाई गाईको दूधमा पकाई उक्त पाकको बीसदिन सम्म बिहान बेलुकी सेवन गर्नाले मस्तिष्क सम्बन्धि सम्पूर्ण रोगको शान्ति हुने गर्दछ ।

ङ) <u>पञ्चमुखी रुद्राक्ष</u> :- यसको ३ दाना धारण गर्नाले भक्ष्याभक्ष्य तथा अन्य दोषको शान्तिका साथै पञ्चानन शिव प्रसन्न हुनु हुन्छ । पहेलो ५ मुखी रुद्राक्ष घोटी नेत्रमा लगाउनाले आँखाको जालो हट्दछ । यसका अतिरिक्त कालो गाईको गोवर, उक्त रुद्राक्ष भस्म एवं गंगाजललाई आपसमा मिलाई लेप तयार पारी सम्वन्धित ठाउँमा लगाउनाले चर्मरोग ठीक हुन्छ ।

च) <u>षड्मुखी रुद्राक्ष</u> :- व्यापारी वर्गका लागि अतीव उपयोगी मानिन्छ । यो ऋद्धि सिद्धि प्राप्ति हेतु तथा हिष्टिरिया, मुर्छा, पागलपन तथा उदरविकार सम्बन्धी रोग एवं स्त्रीसम्वन्धी रोगशान्तिका लागि उपयोगी मानिन्छ । उक्त रुद्राक्षको चूर्ण १ भाग र सीतोपलादि चूर्ण ४ भाग नित्य महका साथमा सेवन गर्नाले श्वास-प्रश्वास रोगको उपचार हुन्छ ।

छ) <u>सप्तमुखी रुद्राक्ष</u> :- द्वारा निर्वल व्यक्ति सवल, दरिद्र-धनी, सदाचारी निरोगी हुन्छ । यसलाई पनि उक्त वैदिक रीति अनुरूप धारण गर्नु पर्दछ ।

ज) <u>अष्टमुखी रुद्राक्ष</u> :- आयुबर्धक हुन्छ । यसको अतिरिक्त धार्मिक मान्यताका आधारमा असत्य भाषण जनित पापबाट बचाउने वाला हुन्छ । यसको धारण पनि उक्त रीति अनुसार नैं गर्नुपर्दछ ।

झ) <u>नवमुखी रुद्राक्ष</u> :- नवदुर्गा सदृश मानिएको छ । यसलाई व्यक्तिको मणिवन्ध (नाडीमा) बाध्नु पर्दछ । यसले व्यक्तिलाई सम्पन्न र निरोगी बनाउछ । यसको अतिरिक्त "<u>ॐ ह्रीं 'दुं' दुर्गायै नमः</u>" मन्त्रले शुद्धतापूर्वक, उक्तमुखी रुद्राक्षमालाको जप एक सहस्र, १ महीना सम्म नबिराई गरेमा नचिताएको फल समेत प्राप्त हुन्छ ।

ञ) <u>दशमुखी रुद्राक्ष</u> :- धारण गर्नाले नवग्रह जनित दुःखको शान्ति हुन्छ । उक्त रुद्राक्ष धारणकर्ता माथि मारण, मोहन, स्तम्भन, उच्चाटन आदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

गरिएका तान्त्रिक प्रयोग व्यर्थ हुन्छन् । यस बाहेक गाईको दूधमा उक्त रुद्राक्ष घोटी त्यसको रस रोगीलाई चटाएमा त्यसको खोकी निको हुन्छ ।

ट) <u>एकादशमुखी रुद्राक्ष</u> :- स्त्रीवर्गका लागि अतीव उपयोगी मानिन्छ । यसलाई संस्कार पूर्वक धारण गर्नाले उनका श्रीमान्को सुरक्षा हुनुका साथै सौभाग्य वृद्धि पनि हुने गर्दछ । यसको अतिरिक्त यो रुद्राक्ष हनुमत् स्वरूप पनि भएकोले "ॐ ह्रीं ह्रः पवन नन्दनाय स्वाहा" मन्त्रको १०८ पटक, प्रतिदिनको हिसावले उक्त रुद्राक्षमालाद्वारा कम्तीमा १ महीनासम्म जप गरेमा रुद्र अंशाावतार हनुमान् प्रसन्न हुनु हुन्छ । यस मन्त्रको जप सधै गरेमा हनुमान सधै भरी उक्त व्यक्तिका साथमा रहनु हुन्छ ।

ठ) <u>द्वादशमुखी रुद्राक्ष</u> :- धारण गर्नाले भगवान विष्णु र सूर्यदेवको कृपा रहन्छ । यसको अतिरिक्त "ॐ ह्रीं श्रीं घृणि सूर्य आदित्य श्रीं ह्रीं ॐ" मन्त्र प्रतिदिन एक हजार पटक जप, उक्त रुद्राक्षमाला द्वारा गरेमा १० दिन भित्र नै व्यक्तिको जीवनमा चमत्कारिक परिवर्तन हुन्छ । सबैतिर उपचार गराई थाकेका रोगीहरुका लागि उक्त रुद्राक्ष द्वारा गरिएको जपले निरोगी तुल्याउछ र चमत्कारिक हिसावले फल समेत दिन्छ ।

ड) <u>त्रयोदशमुखी रुद्राक्ष</u> :- सर्वकामना प्रदान गर्ने, निःसन्तानलाई सन्तान दिने वुटि हो । यसको प्रयोग विधि यसरी रहेको छ । प्रातः उठ्ने, कसैसित नबोली नुहाउने, अनि "ॐ ह्रीं श्रीं भगवति चिन्तामणि सिद्धिं स्वार्थं देहि देहि स्वाहा" मन्त्रको जप उक्त रुद्राक्षमाला द्वारा १०८ पटक गर्ने । यो क्रम एक महिना सम्म नविराई जारी राख्ने, जसको प्रभावले जपकर्ताको सम्पूर्ण मनोकामना सिद्ध हुनुका साथै सन्तानोत्पत्ति समेत हुन्छ । यसमा सन्देह गर्नु हुदैन, तर स्त्री-पुरुषदुवै स्वास्थ्यको दृष्टिले ठीक हुनुपर्दछ ।

ढ) <u>चतुर्दशमुखी रुद्राक्ष</u> :- व्यक्तिले निधारमा, उक्त रुद्राक्षको लेप रात्रीमा लगाउनु पर्दछ । जसको प्रभावले धारकको विभिन्न रोगशान्ति हुन्छ । उक्त मालाले जप गरेमा मनले चिताएको पुग्दछ । स्त्री सम्वन्धी आन्तरिक रोग एवं शिथिलताको उपचारमा समेत यसको लेपले महत्वपूर्ण भूमिका निभाउँछ ।

<u>रुद्राक्ष द्वारा गरिने अन्य प्रयोगात्मक उपचार</u> :-

यद्यपि उक्त १४ मुखी पर्यन्त रुद्राक्षको उपचार विधि अलग-अलग उल्लेख गरी सकिएको छ । परन्तु उक्त रुद्राक्षको अभावमा अन्य सबै रुद्राक्षले पनि रोग शान्त (नाश) गर्न सक्तछन् । तसर्थ यसको प्रयोग विधि आंशिक रूपमा यस प्रकार रहेको छ -

१) <u>पक्षाघातबाट बच्न</u> :- दुवै पाखुरामा रुद्राक्षको अभिमन्त्रित दाना वाध्नाले पक्षाघातवाट वच्न सकिन्छ । यसको साथै स्नायु सम्वन्धी रोगवाट पनि वच्न सकिन्छ ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: M

२) <u>उच्च रक्तचाप</u> :- यस प्रकारका रोगीले ५ मुखी रुद्राक्ष घाटीमा माला झैं धारण गर्नुपर्दछ र त्यसको स्पर्श हृदयमा गराई रहनु पर्दछ । यसको अतिरिक्त रुद्राक्ष भस्मलाई स्वर्ण-माक्षिक-भस्मका साथ १-१ रत्ती बिहान बेलुकी दही, दूध या तरमा मिलाई सेवन गर्नाले पनि उक्त रक्तचाप क्रमशः ठीक हुन्छ ।

३) <u>अपस्मार (मिर्गी-छारे) रोग</u> :- उक्त रोगीलाई, रुद्राक्षको भित्री गुदीको चूर्ण बनाई प्रतिदिन १-१ चम्चा शुद्ध पानीका साथ दिएमा रोगीको रोग क्रमशः कम हुदै जान्छ ।

४) <u>दम</u> :- उक्त रोगीलाई रुद्राक्ष, हर्रो, किशमिश, असूरोको वोक्रा सममात्रामा मिलाई १ केजी पानीमा पकाउने र एक पाउ पानी बाकी रहदा निकाल्ने । त्यसमा २, ३ ग्राम शुद्ध मह मिसाउने र बिहान बेलुकी रोगीलाई उक्त काढा मनतातो पिउन दिने । यसरी उपचार गरेमा दम क्रमशः ठीक हुदै जान्छ ।

५) <u>विष शान्ति</u> :- कुनै सर्प जनित विष या अन्य जीवजन्तुको टोकाइवाट उत्पन्न विष शरीरमा प्रविष्ट भएमा रुद्राक्षफलको चार गुना ककोडा (चटेलो) को जरोलाई एक लीटर पानीमा पकाउने, ५० ग्राम पानी बाँकी भएपछि निकाल्ने, त्यसमा गाईको १०० ग्राम शुद्ध घिउ मिलाउने र उक्त काँढा विषभक्षक रोगीलाई पिलाउने गर्नुपर्दछ । जसले विषको प्रभावलाई नष्ट गरिदिन्छ ।

६) <u>अर्श (बवाशीर-हर्षा) रोग</u> : २०० ग्राम रुद्राक्षमा अपामार्गको ८०० ग्राम बिउ मिलाई काँढा बनाउनु । त्यसको १/४ भाग बाँकी भएपछि निकाल्नु । अनि सबै रुद्राक्ष काढाबाट छानी निकाल्नु र रोगीलाई उक्त काढाको १०, १२ थोपा प्रतिदिन सेवन गराउनु । यसो गरेमा उक्त रोग शान्त हुन्छ । यसरी नै रुद्राक्ष एवं त्रिफलाको मात्रा क्रमश : १, ४ राखी त्यसको चूर्ण बनाई, महमा मिलाई उक्त लेपलाई गुदा स्थानमा नित्य लगाउनाले रोग शान्ति हुन्छ ।

७) <u>नेत्ररोग शान्ति</u> :- धेरै समयसम्म मसिनो काम गर्दा आँखा थाकेमा, पोलेमा, वस्तु आकृति अस्पष्ट भएमा रुद्राक्षको दाना जलमा १ घण्टा राख्ने र उक्त पानीले आँखा धुने, पुछ्ने र एक छिन आँखा चिम्ली राख्ने । १०, १५ मिनेट पछि मात्र खोल्ने । यसो गरेमा सबै वस्तु स्पष्ट एवं राम्ररी देखिन्छन् । आँखाले आराम पनि पाउँछ ।

८) <u>कर्णरोग शान्ति</u> :- एकाएक कान बन्द हुनु, कान पाक्नु, कानबाट पीप आउनु इत्यादि भएमा रुद्राक्षको दाना पानीले धुने र त्यसको २ थोपा पानी कानमा लगाउनाले कर्णरोग शान्ति हुन्छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

९) डण्डीफोर उपचार :- रुद्राक्ष, पठानीलोध, वच, मरीच, वंशलोचन, धनिया, सेतो सरसिउ र सिधो नून सबै समभागमा मिलाई त्यसको लेप तयार गर्ने र नियमित रूपमा किशोर किशोरीहरुले लेप लगाउने, लेप सुकेपछि मुख धुने । यसरी १ महिना प्रयोग गरेमा सबै मुखका फोडाफुन्सी, डण्डीफोर आदि नष्ट हुन्छन् र मुख पनि चम्किलो हुन्छ ।

१०) केश-रोग उपचार :- रुद्राक्ष, त्रिफला (हर्रो, वर्रो, अमला) लौहचूर्ण (बुरादा), भृंगराज र कालो माटो सबै समभागमा मिलाई पिस्ने । उखुको रसमा मिलाई कुनै भाँडोमा राख्ने र त्यो भाडो कुनै खाल्डोमा मुख बन्द गरी पुरी दिने, १ महिना पछि उक्त भाडो निकाल्ने, लेप तयार भएको हुन्छ । उक्त लेपलाई ३/ ४ महिना नित्य अलिअलि लगाएमा कपाल झर्ने, कपाल सेतो हुने आदि रोगबाट मुक्ति पाइन्छ र कपाल उत्तरोत्तर कालो हुँदै जान्छ ।

११) टाउको दुःखेमा :- रुद्राक्ष घोटी त्यसमा कपूर मिलाई त्यसको लेप निधारमा लगाउनाले टाउको दुखेको कम हुन्छ ।

१२) घाउ-खटिरा शान्ति :- रुद्राक्षको फल र नीमको पत्ती मिलाई पकाउने, त्यस पानीले घाउ धुने र त्यसको मलम बनाई लगाएमा घाउ, खटिरा आदि निको हुन्छ ।

१३) अजीर्ण (अपच) शान्ति :- मरीच र रुद्राक्षको चूर्ण बनाई, वासी पानीका साथ खाली पेटमा, सेवन गर्नाले उक्त रोग शान्त हुन्छ ।

१४) दाद-खुजली शान्ति :- रुद्राक्ष, वेसार (गाठो) हरियो दूवो सममात्रामा मिलाई मोहीका साथमा लेप तयार गरी उक्त लेप दाद भएको तत्-तत् स्थानमा लगाउनाले उक्त रोग शान्त हुन्छ ।

१५) गठिया उपचार :- बाखाको दूधमा रुद्राक्ष फल घोटी लगाउनाले उक्त रोग शान्त हुन्छ ।

१६) सुखा खोकी :- दशमुखी रुद्राक्षलाई गाईको ताजा दूधमा घोटेर दिनमा तीन पटक रोगीलाई चटाएमा पुरानो सुखा खोकी समेत नीको हुन्छ । यो क्रम एक हप्ता सम्म जारी राख्नुपर्दछ ।

१७) आँखाको कचेरा-जाला :- ५मुखी रुद्राक्षको दानालाई घोटी गाजल जस्तै लेप बनाई, राती आँखामा लगाई सुत्ने । यसरी उक्त प्रकारले रुद्राक्षको प्रयोग गरेमा कचेरा हराउदै जान्छन् ।

१८) चर्मरोग :- ५मुखी रुद्राक्ष भस्म र कालो गाईको सुकेको गोवर दुवैलाई गंगाजलमा मिलाएर लगाएमा हर प्रकारको चर्मरोग ठीक हुन्छ ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: ...

१९) <u>कुष्ठ (कोढ)</u> :- ९मुखी श्वेतरुद्राक्षको भस्म र तुलसीको रस दुवै मिलाई त्यसको घोल कोढ भएको स्थानमा लगाउनाले केही हप्तामा नै कुष्ठ (कोढ) सुक्दछ र रोग निको हुन्छ ।

२०) <u>पोतो (दाग)</u> :- ५मुखी रुद्राक्षको दाना तुलसीको रसमा घोट्ने अनि त्यसलाई कागतीको रसमा मिलाउने, उक्त लेप मुखमा क्रीम जस्तै लगाउने गरेमा दाग-खत सवै हराएर जान्छन् र छाला राम्रो हुदै जान्छ।

२१) <u>कामशक्ति बढाउने</u> :- १४मुखी रुद्राक्षको दाना पानीमा घोली प्रतिदिन रात्रिमा रोगीले आफ्नो टाउकोमा लगाउनाले नपुंसकव्यक्तिमा पनि कामशक्तिको विकाश हुन्छ । यसरी नै यदि कुनै स्त्रीमा ठंडापन आएमा उक्त लेप स्त्रीको स्तनको अग्रभागमा लगाउनाले केही दिनमा नै कामशक्ति बढ्दछ ।

२२) <u>गर्भ संरक्षण</u> :- यदि कुनै स्त्रीलाई गर्भपातको डरभएमा अभिमन्त्रित कालो रुद्राक्ष-दाना स्त्रीको कम्मरमा बाध्नु पर्दछ । जसले गर्भपतनको भय निर्मूल हुन्छ ।

२३) <u>सौन्दर्य बढाउन</u> :- अष्टमुखी रुद्राक्ष एवं हाडे बदामको कोयो (गुदी) लाई पिसी त्यो चूर्ण गुलाबजलमा मिलाई मुखमा लगाउने र एक घण्टा पछि मुख धुने । यसरी उक्त क्रिया बारंवार गरेमा केही दिनमा मुखको सुन्दरता बढ्दछ ।

२४) <u>दैनिक बाधा शान्ति हेतु</u> :- रुद्राक्षको प्रयोग गर्ने गरिन्छ । रुद्राक्ष गलामा धारण गर्नाले भूत, प्रेत, अदृश्यआत्मावाट सुरक्षित हुइन्छ । यसरीनै रुद्राक्षको चन्दन (लेप) बनाई निधारमा लगाउनाले धारकमा सम्मोहक शक्ति आउछ । शरीरमा लगाउनाले शारीरिक बाधा, शिरपीडा समेत हट्दछ ।

२५) <u>उदरविकार शान्ति हेतु</u> :- रुद्राक्षको प्रयोग गरिन्छ । रुद्राक्षको परिपक्व ५ दाना पानीले भरिएको ताँमाको लोटा या जगमा बेलुकी राख्ने र बिहान उठी खाली पेटमा त्यो पानी पेटभरी पिउने । पुन: उक्त रीतिले पानी राख्ने र राखेको २४ घण्टा पछि पेटभरी पिउने । त्यसरी प्रतिदिन पानी पिउनाले शारीरिक सुस्ती, अनिन्द्रा आदि रोग समेत नष्ट हुन्छन् । तर ताम्रपात्रमा अमिलो वस्तु तथा दूध कहिले न राख्नु , राख्नाले त्यो दूषित हुन्छ र विपरित फल दिनेबाला हुन्छ । अमिलो पदार्थ केवल उक्त पात्र माज्न मात्र प्रयोग गर्नु पर्दछ ।

२६) <u>बालरोग निवारण हेतु</u> :- पनि रुद्राक्षको प्रयोग गरिन्छ । राती झस्किने, रुने तथा डराउने बच्चाका लागि यो अतीव उपयोगी मानिन्छ । त्यसको निदानका लागि २ या ३ अभिमन्त्रित रुद्राक्षका दाना बच्चाको घाँटीमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

९) डण्डीफोर उपचार :- रुद्राक्ष, पठानीलोध, वच, मरीच, वंशलोचन, धनिया, सेतो सरसिउ र सिधो नून सबै समभागमा मिलाई त्यसको लेप तयार गर्ने र नियमित रूपमा किशोर किशोरीहरुले लेप लगाउने, लेप सुकेपछि मुख धुने । यसरी १ महिना प्रयोग गरेमा सबै मुखका फोडाफुन्सी, डण्डीफोर आदि नष्ट हुन्छन् र मुख पनि चम्किलो हुन्छ ।

१०) केश-रोग उपचार :- रुद्राक्ष, त्रिफला (हर्रो, वर्रो, अमला) लौहचूर्ण (बुरादा), भृंगराज र कालो माटो सबै समभागमा मिलाई पिस्ने । उखुको रसमा मिलाई कुनै भाँडोमा राख्ने र त्यो भाडो कुनै खाल्डोमा मुख वन्द गरी पुरी दिने, १ महिना पछि उक्त भाडो निकाल्ने, लेप तयार भएको हुन्छ । उक्त लेपलाई ३/ ४ महिना नित्य अलिअलि लगाएमा कपाल झर्ने, कपाल सेतो हुने आदि रोगवाट मुक्ति पाइन्छ र कपाल उत्तरोत्तर कालो हुँदै जान्छ ।

११) टाउको दुःखेमा :- रुद्राक्ष घोटी त्यसमा कपूर मिलाई त्यसको लेप निधारमा लगाउनाले टाउको दुखेको कम हुन्छ ।

१२) घाउ-खटिरा शान्ति :- रुद्राक्षको फल र नीमको पत्ती मिलाई पकाउने, त्यस पानीले घाउ धुने र त्यसको मलम वनाई लगाएमा घाउ, खटिरा आदि निको हुन्छ ।

१३) अजीर्ण (अपच) शान्ति :- मरीच र रुद्राक्षको चूर्ण वनाई, वासी पानीका साथ खाली पेटमा, सेवन गर्नाले उक्त रोग शान्त हुन्छ ।

१४) दाद-खुजली शान्ति :- रुद्राक्ष, वेसार (गाठो) हरियो दूवो सममात्रामा मिलाई मोहीका साथमा लेप तयार गरी उक्त लेप दाद भएको तत्-तत् स्थानमा लगाउनाले उक्त रोग शान्त हुन्छ ।

१५) गठिया उपचार :- वाखाको दूधमा रुद्राक्ष फल घोटी लगाउनाले उक्त रोग शान्त हुन्छ ।

१६) सुखा खोकी :- दशमुखी रुद्राक्षलाई गाईको ताजा दूधमा घोटेर दिनमा तीन पटक रोगीलाई चटाएमा पुरानो सुखा खोकी समेत नीको हुन्छ । यो क्रम एक हप्ता सम्म जारी राख्नुपर्दछ ।

१७) आँखाको कचेरा-जाला :- ५मुखी रुद्राक्षको दानालाई घोटी गाजल जस्तै लेप वनाई, राती आँखामा लगाई सुत्ने । यसरी उक्त प्रकारले रुद्राक्षको प्रयोग गरेमा कचेरा हराउदै जान्छन् ।

१८) चर्मरोग :- ५मुखी रुद्राक्ष भस्म र कालो गाईको सुकेको गोवर दुवैलाई गंगाजलमा मिलाएर लगाएमा हर प्रकारको चर्मरोग ठीक हुन्छ ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: M

१९) कुष्ठ (कोढ) :- ९मुखी श्वेतरुद्राक्षको भस्म र तुलसीको रस दुवै मिलाई त्यसको घोल कोढ भएको स्थानमा लगाउनाले केही हप्तामा नै कुष्ठ (कोढ) सुक्दछ र रोग निको हुन्छ।

२०) पोतो (दाग) :- ५मुखी रुद्राक्षको दाना तुलसीको रसमा घोट्ने अनि त्यसलाई कागतीको रसमा मिलाउने, उक्त लेप मुखमा क्रीम जस्तै लगाउने गरेमा दाग-खत सवै हराएर जान्छन् र छाला राम्रो हुदै जान्छ।

२१) कामशक्ति बढाउने :- १४मुखी रुद्राक्षको दाना पानीमा घोली प्रतिदिन रात्रिमा रोगीले आफ्नो टाउकोमा लगाउनाले नपुंसकव्यक्तिमा पनि कामशक्तिको विकाश हुन्छ। यसरी नै यदि कुनै स्त्रीमा ठंडापन आएमा उक्त लेप स्त्रीको स्तनको अग्रभागमा लगाउनाले केही दिनमा नै कामशक्ति बढ्दछ।

२२) गर्भ संरक्षण :- यदि कुनै स्त्रीलाई गर्भपातको डरभएमा अभिमन्त्रित कालो रुद्राक्ष-दाना स्त्रीको कम्मरमा बाध्नु पर्दछ। जसले गर्भपतनको भय निर्मूल हुन्छ।

२३) सौन्दर्य बढाउन :- अष्टमुखी रुद्राक्ष एवं हाडे बदामको कोयो (गुदी) लाई पिसी त्यो चूर्ण गुलाबजलमा मिलाई मुखमा लगाउने र एक घण्टा पछि मुख धुने। यसरी उक्त क्रिया बारंवार गरेमा केही दिनमा मुखको सुन्दरता बढ्दछ।

२४) दैनिक बाधा शान्ति हेतु :- रुद्राक्षको प्रयोग गर्ने गरिन्छ। रुद्राक्ष गलामा धारण गर्नाले भूत, प्रेत, अदृश्यआत्मावाट सुरक्षित हुइन्छ। यसरीनै रुद्राक्षको चन्दन (लेप) बनाई निधारमा लगाउनाले धारकमा सम्मोहक शक्ति आउछ। शरीरमा लगाउनाले शारीरिक बाधा, शिरपीडा समेत हट्दछ।

२५) उदरविकार शान्ति हेतु :- रुद्राक्षको प्रयोग गरिन्छ। रुद्राक्षको परिपक्व ५ दाना पानीले भरिएको ताँमाको लोटा या जगमा वेलुकी राख्ने र बिहान उठी खाली पेटमा त्यो पानी पेटभरी पिउने। पुनः उक्त रीतिले पानी राख्ने र राखेको २४ घण्टा पछि पेटभरी पिउने। त्यसरी प्रतिदिन पानी पिउनाले शारीरिक सुस्ती, अनिन्द्रा आदि रोग समेत नष्ट हुन्छन्। तर ताम्रपात्रमा अमिलो वस्तु तथा दूध कहिले न राख्नु, राख्नाले त्यो दूषित हुन्छ र विपरित फल दिनेवाला हुन्छ। अमिलो पदार्थ केवल उक्त पात्र माज्न मात्र प्रयोग गर्नु पर्दछ।

२६) बालरोग निवारण हेतु :- पनि रुद्राक्षको प्रयोग गरिन्छ। राती झस्किने, रुने तथा डराउने बच्चाका लागि यो अतीव उपयोगी मानिन्छ। त्यसको निदानका लागि २ या ३ अभिमन्त्रित रुद्राक्षका दाना बच्चाको घाँटीमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

बाँधी दिनु पर्दछ। रुद्राक्ष मिश्रित जल समेत बच्चालाई पिलाई दिनु पर्दछ। त्यसको अतिरिक्त उक्त रुद्राक्षको लेप बच्चालाई रात्रिमा लगाई दिनु पर्दछ। यसरी उक्त रीतिले उपचार गरेमा बच्चाको रोग शान्त हुन्छ।

२७) बन्ध्यत्व निवारण हेतु :- पनि रुद्राक्षको प्रयोग गरिन्छ। यसका लागि एक दाना (परिपक्व अमलाको दाना जत्रो) रुद्राक्ष र एक तोला सुगन्धरास्ना खल बच्चामा कुटी त्यसको चूर्ण बनाउने र त्यसको २ या ३ रत्तिको मात्रा बनाई गाईको शुद्ध दूधमा मिलाई प्रातः सायंकाल पिउने गर्नु पर्दछ। उक्त औषधी स्त्री जाति (विवाहित)ले ऋतुमती भएको पहिलो दिन देखि प्रतिदिन नबिराई लगातार ७ दिन सम्म पिउनु पर्दछ। उक्त औषधीको प्रभावले बन्ध्यत्व दोषको निवारण हुन्छ। तर स्त्री पुरुष दुवैको स्वास्थ्य आयु तथा दाम्पत्य जीवन पूर्ण रूपमा ठीक (फीट) हुनु पर्दछ।

समस्या :- पहिले रुद्राक्षका वृक्ष यत्र-तत्र उपयोगी स्थलमा पाइन्थे र रुद्राक्षको जङ्गल हुने गर्दथ्यो। तर अहिले हराउदै गएकाले कतै-कतै मात्र रुद्राक्षका वृक्ष पाइने गर्दछन्। यद्यपि कुनै पनि वस्तुको संरक्षणमा अनेक समस्या हुने गर्दछन्। त्यस अनुरूप रुद्राक्षको संरक्षण र सम्वर्धनबारे केही समस्या देखिएका छन्! ती बूँदागत रूपमा यस प्रकार रहेका छन् -

१) रुद्राक्षको वृक्ष मासिनु, दाउरा घाँस आदिमा प्रयोग हुनु।
२) अनेक जातिका रुद्राक्षको पहिचान न हुनु।
३) रुद्राक्षफलको व्यवस्थित संरक्षण र उपयोग नहुनु।
४) दुर्लभ रुद्राक्षको खोजी र संरक्षण नहुनु।
५) रुद्राक्षको महत्त्व र उपचारबारे जनमानसमा जानकारी नहुनु।
६) रुद्राक्षको रुख लगाउन सरकारले प्रोत्साहित नगर्नु।
७) ३८ प्रकारका रुद्राक्षको वर्णन भएता पनि सबै उपलब्ध नहुनु।
८) रुद्राक्ष बिरुवाको अभाव हुनु।
९) रुद्राक्षफल पृथ्वीमा १० महिना सम्म रोपिएको अवस्थामा मात्र अंकुरित हुनु। कहिलेकाहि एक या दुई वर्ष पछि मात्र अंकुरित हुनु इत्यादि।

समाधान :- "यत्ने कृते यदि न सिद्धयति कोत्र दोषः" अर्थात् प्रयत्न गर्दा गर्दै यदि कुनै समस्याको समाधान हुन सकेन भने दोष लाग्दैन, तर प्रयत्नै गरिएन भने दोष अवश्य लाग्दछ। तसर्थ उक्त रुद्राक्षसम्बन्धि समस्याको समाधानबारे केही दृष्टिकोण बूँदागत रूपमा यस प्रकार रहेका छन् -

१) रुद्राक्ष वृक्षको संरक्षण एवं संवर्धनमा जोड दिने।
२) यसको महत्त्व र उपचारको बारेमा जनमानसमा व्यापक प्रचार-प्रसार गर्ने।
३) अनेक प्रकार एवं वर्णका रुद्राक्षको खोजी गरी त्यसलाई यत्र तत्र उपयोगी स्थानमा लगाउने।
४) रुद्राक्षको धार्मिक एवं उपचारोपयोगी महत्त्व भएकाले रुद्राक्षको वृक्ष भएको स्थलमा फोहोरमैला नगर्ने।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

५) रुद्राक्ष वृक्षको हावा, फल र दाउरा समेत अत्यधिक उपयोगी भएकाले प्रत्येक परिवारले कम्तिमा एक एक रुद्राक्षको वृक्ष आ-आफ्नो बारीमा अवश्य रोप्ने ।

६) आयुर्वेदको अनुसार रुद्राक्ष अतीव उपचारोपयोगी भएकाले त्यसलाई जङ्गलको रूपमा विकसित गर्ने ।

७) रुद्राक्ष वृक्षस्थललाई पवित्र स्थलको रूपमा विकसित गर्ने ।

८) उक्त स्थललाई अध्ययन एवं प्रवचन क्षेत्रको रूपमा स्थापित गर्ने ।

९) रुद्राक्ष विरुवा सर्व सुलभ हुनु पर्ने ।

निष्कर्ष :- यसरी उपर्युक्त शक्तिले युक्त भएका एक मुखी देखि १४ मुखी पर्यन्त शिवस्वरूप, धार्मिक दृष्टिले पवित्र तथा उपचारोपयोगी रुद्राक्षको वर्णन जति गरे पनि थोरै नै हुन्छ । रुद्राक्षका वृक्षको हावाले समेत विभिन्न रोग ठीक गर्न सक्तछ । यद्यपि रुद्राक्षमाला-ब्राह्मण, क्षत्रीय, वैश्य, शूद्र सबै वर्णका व्यक्तिले क्रमशः सेता, राता, पहेला र काला धारण गर्नु पर्दछ भन्ने उल्लेख भएको पाइन्छ ता पनि सबै रुद्रनेत्रबाट नै उत्पन्न भएकाले भरसक शास्त्रीय नियमको पालना गर्ने नपाइएमा उक्त रुद्राक्ष मध्ये कुनै पनि रुद्राक्ष, त्यो नभेटिए भद्राक्ष समेत सबै वर्णले धारण गरे हुन्छ । तर ती रुद्राक्ष, भद्राक्ष आदि उक्त वैदिक संस्कारद्वारा अभिमन्त्रित (सुसंस्कृत) हुनु पर्दछ । यसरी[1] उक्त संस्कारयुक्त रुद्राक्ष धारणगरेमा म्लेच्छ, नीच, चाण्डाल समेत सबै पापबाट मुक्त हुन्छ भन्ने कुरो उल्लेख गरिएको पाइन्छ । यसरी नै अन्य स्थलमा शिवको वचन उद्धृत गर्दै भनिएको छ[2]- जसले शिरमा रुद्राक्ष या रुद्राक्षमाला राखी नुहाउछ, त्यसले गंगास्नान गरे सदृश फल प्राप्त गर्दछ । यसको अतिरिक्त उक्त वर्णित रुद्राक्ष मध्ये १ मुखी, ५ मुखी, ११ मुखी र १४ मुखी लोकमा पूजनीय मानिन्छन् ।

त्यसकारण भगवान् नारायणको भनाई उद्धृत गर्दै भनिएको छ[3]- रुद्राक्षको महिमा वर्णन गरेर सकिदैन । रुद्राक्षको दर्शन स्पर्शन, धारण र उक्त मालाले जप गरेमा क्रमशः उत्तरोत्तर पुण्यफलको प्राप्ति र रोगको उपचार समेत हुन्छ । रुद्राक्ष न भेटिदा भद्राक्ष धारण गरे हुन्छ । यसरी नै उपनिषद्मा भनिएको छ-रुद्राक्षको दाना या मालाको संस्कार गर्दा, होमगर्दा, रुद्राक्ष

---

१) म्लेच्छो वाप्यथ चाण्डालो युतो वा सर्वपातकैः । रुद्राक्षधारणादेव स रुद्रो नात्र संशय : ॥
शिरसा धारिते कोटिः कर्णयोर्दशकोटयः । शतकोटिर्गलेबद्धो मूर्ध्नि कोटिसहस्रकम् ॥
रुद्राक्षधारको भूत्वा यत्किञ्चित् कर्मवैदिकम् । कुर्वन् विप्रः सदा भक्त्या महदाप्नोति तत्फलम् ॥ दे.भा.

२) रुद्राक्षं मस्तके धृत्वा शिरः स्नानं करोति यः । गंगास्नानफलं तस्य जायते नात्र संशयः ॥
एकवक्त्रः पञ्चवक्त्र एकादशमुखापरे । चतुर्दशमुखाः केचिद्रुद्राक्षा लोकपूजिताः ॥ दे.भा.

३) लक्ष्यं तु दर्शनात् पुण्यं कोटिस्तत् स्पर्शनाद् भवेत् । तस्य कोटिगुणं पुण्यं लभते धारणान्नरः ॥
लक्ष्यकोटिसहस्राणि लक्ष्यकोटिशतानि च । तज्जपात् लभते पुण्यं नरो रुद्राक्षधारणात् ॥
रुद्राक्षाणां तु भद्राक्षधारणात् स्यान्महाफलम् ॥ दे.भा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

जाबालोपनिषद्को[४] पाठ गर्नु पर्दछ । उक्त पाठको प्रभावले साधकमाथि शिवजीको सधैंभरी कृपा रही रहन्छ । तसर्थ शिवनेत्रोत्पन्न रुद्राक्ष सबैका लागि वन्दनीय र उपचारोपयोगी छ भन्ने कुरोमा कसैले सन्देह गर्नु हुदैन । यसको संरक्षण र सम्वर्द्धनमा सधैं ध्यानदिन आवश्यक छ ।

यसका साथै रुद्राक्षका दानाको प्रयोगात्मक उपचारपद्धतिवारे पनि अध्ययन अनुसंधानमा उत्तरोत्तर ध्यान दिन र यसको वैज्ञानिक अन्वेषणमा अझ बढी मन लगाउन सबै तहका चिकित्सक एवं वैद्यराजहरुको ध्यानाकर्षण गराउदै, रुद्राक्षको धार्मिक महिमा, धारणा, महत्त्व, उपचारविधि र प्रयोगात्मक चिकित्सा पद्धतिको आंशिक रूपमा भए पनि केही प्रकाश पार्दै यो अनुसंधानात्मक "<u>शिवविन्दु</u>" उपचार महत्त्व दिग्दर्शन सबै गुणग्राही सदसद्विवेकी विद्वत्समुदाय समक्ष प्रस्तुत गरिएको छ । जसमा रहेको सारवस्तुलाई ग्रहण गरी यदि कुनै निःसार वस्तु भेटिन्छ भने त्यसवारे समेत जिज्ञासा, सुधार एवं सुझावको अझ वढी आकांक्षा गर्दै यो रुद्राक्ष उपचार महिमा प्रकरण यहीं पूर्ण हुन्छ ।

---

४) यः इमां रुद्राक्षजाबालोपनिषदं नित्यमधीते । वालो वा युवा वेद स महान्भवति । स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति । एतैरेव होमं कुर्यात् । एतैरेवार्चनम् । एतेनैव शिवसायुज्यमवाप्नोति । न च पुनरावर्तत इति । ॐ सत्यमित्युपनिषद् ॥ रु.जा.उ.पृ.सं.३६१



<u>तिलकको आवश्यकता :-</u>

(क) स्नानं दानं तपो होमो देवता पितृकर्म च । तत् सर्वं निष्फलं याति ललाटे तिलकं विना ॥
ब्राह्मणस्तिलकं कृत्वा कुर्यात् सन्ध्यां च तर्पणम् ॥ ब्र.वै.पु., बह्म २६

(ख) ललाटे तिलकं कृत्वा सन्ध्याकर्म समाचरेत् । अकृत्वा भालतिलकं तस्य कर्म निरर्थकम् ॥
ऊर्ध्वपुण्ड्रं मृदा कुर्यात् भस्मना वै त्रिपुण्ड्रकम् । उभयं चन्दनेनैव अभ्यङ्गोत्सवरात्रिसु ॥
प्रवन्ध पारिजात

(ग) यस्य भाले विभूतिर्न नांगे रुद्राक्षधारणम् । न शम्भोर्भवने पूजा स विप्रः श्वपचाधमः ॥
दे.भा.११ अ. ५,७

(घ) आदिगुरुर्ईस्वतरा च पश्चात् पूर्वं लघुवृद्धिमती क्रमेण ।
दिनस्य पूवार्द्ध-परार्द्ध भिन्ना छायेव मैत्री खल-सज्जनानाम् ॥

(ङ) दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् । मणिना भूषितः सर्पः किमसौ न भयङ्कर : ॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: ...

परिशिष्ट खण्ड-१



(क) अथ श्रीमृतसञ्जीवनकवचम् :-

ध्यानम् :- ॐ कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवनं नाम कवचं प्रजपेत् सदा ॥१॥
सारात् सारतरं पुण्यं गुह्याद् गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसञ्जीवनाभिधम् ॥२॥
समाहितमना भूत्वा श्रृणुष्व कवचं शुभम् ।
श्रुत्वैतद् दिव्यकवचं रहस्यं कुरु सर्वदा ॥३॥
जराभयकरो यज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ॥४॥
दधानः शक्तिमभयां त्रिमुखः षड्भुजः प्रभुः ।
सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥५॥
अष्टादशभुजोपेतो दण्डाभयकरो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदाऽवतु ॥६॥
खड्गाभयकरो धीरो रक्षोगणनिषेवितः ॥
रक्षोरूपी महेशो मां नैर्ऋत्यां सर्वदाऽवतु ॥७॥
पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।
वरुणात्मा महादेवः पश्चिमे मां सदाऽवतु ॥८॥
गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥९॥
शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥१०॥
शूलाभयकरः सर्वविद्यानामधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥११॥
ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माऽधः सदाऽवतु ।
शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥१२॥
भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रोऽवतु लोचने ।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान् मे गिरिशोऽवतु ॥१४॥
मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥१५॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वे मे पार्वतीपतिः ॥१६॥
कटिद्वयं गिरीशो मे पृष्ठं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥१७॥
जानुनी मे जगद्धर्ता जङ्घे मे जगदीश्वरः ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥१८॥
गिरीशः पातु मे भार्यां भवः पातु सुतान् मम ।
मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ॥१९॥
सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥२०॥
मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ॥२१॥
यः पठेच्छृणुयान्नित्यं श्रावयेत् सुसमाहितः ।
सोऽकालमृत्युं निर्जित्य सदायुष्यं समश्नुते ॥२२॥
हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।
आधयो व्याधयस्तस्य न भवन्ति कदाचन ॥२३॥
कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ॥२४॥
युद्धारम्भे पठित्वेदमष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥२५॥
न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देवयुद्धमध्येऽपि सर्वदा ॥२६॥
प्रातरुत्थाय सततं यः पठेत् कवचं शुभम् ।
अक्षय्यं लभते सौख्यमिह लोके परत्र च ॥२७॥
सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ॥२८॥
विचरत्यखिलाँल्लोकान् प्राप्य भोगांश्च दुर्लभान् ।
लभते शिवसायुज्यं महादेवप्रसादतः ॥२९॥
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ।
मृतसञ्जीवनं नाम्ना दैवतैरपि दुर्लभम् ॥३०॥

॥इति श्रीमृतसञ्जीवनकवचं सम्पूर्णम् ॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri. Funding: ...

(ख) श्रीरुद्राष्टकस्तोत्रम् :-

ध्यानम् :- ॐ वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं,
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

नमामीशमीशान-निर्वाणरूपं, विभुं व्यापकं ब्रह्मवेद-स्वरूपम् ।
निजं निर्गुणं निर्विकल्पं निरीहं, चिदाकाशमाकाशवासं भजेहम् ॥१॥

निराकारमोंकार-मूलं-तुरीयं, गिरा-ज्ञान-गोतीतमीशं गिरीशम् ।
करालं महाकाल-कालं कृपालं, गुणागार-संसार-पारं नतोऽहम् ॥२॥

तुषाराद्रिशंकाश-गौरं-गभीरं, मनोभूत-कोटि-प्रभा-श्री-शरीरम् ।
स्फुरन्मौलिकल्लोलिनी चारु गंगा, लसद्भालबालेन्दु कण्ठे भुजंगा ॥३॥

चलत्कुंडलं-भ्रू-सुनेत्रं विशालं, प्रसन्नाननं नीलकण्ठं दयालम् ।
मृगाधीशचर्माम्बरं मुण्डमालं, प्रियं शंकरं सर्वनाथं भजामि ॥४॥

प्रचण्डं प्रकृष्टं प्रगल्भं परेशं, अखण्डं अजं भानुकोटि-प्रकाशम् ।
त्रयः शूल-निर्मूलनं शूलपाणिं, भजेऽहं भवानीपतिं भावगम्यम् ॥५॥

कलातीत-कल्याण-कल्पान्तकारी, सदा सज्जनानन्ददाता पुरारी ।
चिदानन्द-संदोह-मोहापहारी, प्रसीद प्रसीद प्रभो मन्मथारी ॥६॥

न यावद् उमानाथ पादारविन्दं, भजन्तीह लोके परे वा नराणाम् ।
न तावद् सुखं शान्ति-संतापनाशं, प्रसीद प्रभो सर्वभूताधिवासम् ॥७॥

न जानामि योगं जपं नैव पूजां, नतोऽहं सदा सर्वदा शंभु तुभ्यम् ।
जरा-जन्म-दुःखौघतातप्यमानं, प्रभो पाहि आपन्नमामीश शंभो ॥८॥

रुद्राष्टकमिदं प्रोक्तं, विप्रेण हर-तोषये ।
ये पठन्ति नरा भक्त्या, तेषां शंभुः प्रसीदति ॥९॥

इति श्रीरुद्राष्टकस्तोत्रं सम्पूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

ॐ श्रीहरिहराभ्यां नमः



"यौ द्वौ शङ्खकपालभूषितकरौ मालास्थिमालाधरौ,
देवौ द्वारवती श्मशाननिलयौ नागारिगोवाहनौ ।
द्वित्र्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ,
पापं मे हरतां सदा हरिहरौ श्रीवत्सगंगाधरौ ॥"

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

(ग) अथ श्रीहरिहराद्वैतस्तोत्रम् :-

ध्यानम् :- ॐ शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे ।
दक्षयज्ञविनाशाय हरिरुद्राय वै नम : ॥
धर्मार्थकाममोक्षाख्यचतुर्वर्गप्रदायिनौ ।
वन्दे हरिहरौ देवौ त्रैलोक्यपरिपायिनौ ॥१॥
एकमूर्तिद्विधाभिन्नौ संसारार्णवतारकौ ।
वन्देऽहं कामदौ देवौ सततं शिवकेशवौ ॥२॥

दयामयौ दीनदरिद्रतापहौ
महोजसौ मान्यतमौ सदा समौ ।
उदारलीलाललितौ सितासितौ
नमामि नित्यं शिवकेशवावहम् ॥३॥

अनन्तमाहात्म्यनिधी विधिस्तुतौ
श्रिया युतौ लोकविधानकारिणौ ।
सुरासुराधीशनुतौ नु तौ जगत्-
पती विधत्तां शिवकेशवौ शिवम् ॥४॥

जगत्त्रयीपालननाशकारकौ
प्रसन्नहासौ विलसत्सदाननौ ।
महाबली मञ्जुलमूर्तिधारिणौ
शिवं विधत्तां शिवकेशवौ सदा ॥५॥

महस्विनौ मोदकरौ परौ वरौ
मुनीश्वरैः सेवितपादपङ्कजौ ।
अजौ सुजातौ जगदीश्वरौ सदा
शिवं विधत्तां शिवकेशवौ मम ॥६॥

नमोस्तु नित्यं शिवकेशवाभ्यां
स्वभक्तसंरक्षणतत्पराभ्याम् ।
देवेश्वराभ्यां करुणाकराभ्यां
लोकत्रयीनिर्मितिकारणाभ्याम् ॥७॥

सलीलशीलौ महनीयमूर्ती
दयाकरौ मञ्जुलसच्चरित्रौ ।
महोदयौ विश्वविनोदहेतू
नमामि देवौ शिवकेशवौ तौ ॥८॥

त्रिशूलपाणिं वरचक्रपाणिं
पीताम्बरं स्पष्टदिगम्बरं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

चतुर्भुजं वा दशबाहुयुक्तं
हरिं हरं वा प्रणमामि नित्यम् ॥९॥
कपालमालाललितं शिवं च
सद् वैजयन्तीस्रगुदारशोभम् ।
विष्णुं च नित्यं प्रणिपत्य याचे
भवत्पदाम्भोरुहयोः स्मृतिः स्यात् ॥१०॥
शिव त्वमेवासि शिवस्वरूपः ।
हरे त्वमेवासि शिवस्वरूपः ।
भ्रान्त्या जनास्त्वां द्विविधस्वरूपं
पश्यन्ति मूढा ननु नाशहेतोः ॥११॥
हरे जना ये शिवरूपिणं त्वां
त्वद्रूपमीशं कलयन्ति नित्यम् ।
ते भाग्यवन्तः पुरुषा कदापि
न यान्ति भास्वत्तनयस्य गेहम् ॥१२॥
शम्भो जना ये हरिरूपिणं त्वां
भवत्स्वरूपं कमलालयेशम् ।
पश्यन्ति भक्त्या खलु ते महान्तो
यमस्य नो यान्ति पुरं कदाचित् ॥१३॥
शिवे हरौ भेदधियाधियुक्ता
मुक्तिं लभन्ते न जना दुरापाम् ।
भुक्तिं च नैवेह परन्तु दुःखं
संसारकूपे पतिताः प्रयान्ति ॥१४॥
हरे हरौ भेददृशो भृशं वै
संसारसिन्धौ पतिताः सतापाः ।
पापाशया मोहमयान्धकारे
भ्रान्ता महादुःखभरं लभन्ते ॥१५॥
सन्तो लसन्तः सुतरां हरौ च
हरे च नित्यं बहुभक्तिमन्तः ।
अन्तर्महान्तौ शिवकेशवौ तौ
ध्यायन्त उच्चैर्मुदमाप्नुवन्ति ॥१६॥
हरौ हरे चैक्यमुदारशीलाः
पश्यन्ति शश्वत्सुखदायिलीलाः ।
ते भुक्तिमुक्ती समवाप्य नूनं
सुखं दुरापं सुतरां लभन्ते ॥१७॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

शिवे शिवेशेऽपि च केशवे च
पद्मापतौ देववरे महान्तः ।
भेदं न पश्यन्ति परन्तु सन्त
स्तयोरभेदं कलयन्ति सत्यम् ॥१८॥
रमापतिं वा गिरिजापतिं वा
विश्वेश्वरं वा जगदीश्वरं वा ।
पिनाकपाणिं खलु शार्ङ्गपाणिं
हरिं हरं वा प्रणमामि नित्यम् ॥१९॥
सुरेश्वरं वा परमेश्वरं वा
बैकुण्ठलोकस्थितमच्युतं वा ।
कैलासशैलस्थितमीश्वरं वा
विष्णुं च शम्भुं च नमामि नित्यम् ॥२०॥
हरिर्दयार्द्राशयतां प्रयातो
हरो दयालूत्तमभावमाप्तः ।
अनेकदिव्यास्त्रधरः परेशः
पायादजस्रं कृपया नतं माम् ॥२१॥
शेषोऽस्ति यस्याभरणत्वमाप्तो
यद्वा सुशय्यात्वमितः सदैव ।
देवः स कोऽपीह हरिर्हरो वा
करोतु मे मञ्जुलमङ्गलं द्राक् ॥२२॥
हरिं हरं चापि भजन्ति भक्त्या
विभेदबुद्धिं प्रविहाय नूनम् ।
सिद्धा महान्तो मुनयो महेच्छा
स्वच्छाशया नारदपर्वताद्याः ॥२३॥
सनत्कुमारादय उन्नतेच्छा
मोहेन हीना मुनयो महान्तः ।
स्वान्तस्थितं शङ्करमच्युतं च
भेदं परित्यज्य सदा भजन्ते ॥२४॥
शिष्टा वसिष्ठादय आत्मनिष्ठाः
श्रेष्ठस्वधर्मावनकर्मवित्ताः ।
हृत्तापहारं मलहीनचित्ता
हरिं हरं चैकतया भजन्ते ॥२५॥
अन्ये महात्मान उदारशीला
भृग्वादयो ये परमर्षयस्ते ।
पश्यन्ति चैक्यं हरिशर्वयोः श्री-
संयुक्तयोरत्र न संशयोऽस्ति ॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

इन्द्रादयो देववरा उदारा-
स्त्रैलोक्यसंरक्षणदत्तचित्ताः ।
हरिं हरं चैकसुरूपमेव
पश्यन्ति भक्त्या च भजन्ति नूनम् ॥२७॥
सर्वेषु वेदेषु खलु प्रसिद्धो
वैकुण्ठकैलासगयोस्तु धाम्नोः ।
मुकुन्दबालेन्दुवतंसयोः स-
च्चरित्रयोरीश्वरयोरभेदः ॥२८॥
सर्वाणि शास्त्राणि वदन्ति नूनं
हरेर्हरस्यैक्यमुदारमूर्ते : ।
नास्त्यत्र सन्देहलवोऽपि सत्यं
नित्यं जना धर्मधना वदन्ति ॥२९॥
सर्वैः पुराणैरिदमेवमुक्तं
यद्विष्णुशम्भ्वोर्महनीयमूर्त्योः ।
ऐक्यं सदैवास्ति न भेदलेशोऽ-
प्यस्तीह चिन्त्यं सुजनैस्तदेवम् ॥३०॥
भेदं प्रपश्यन्ति नराधमा ये
विष्णौ च शम्भौ च दयानिधाने ।
ते यान्ति पापाः परितापयुक्ता
घोरं विशालं निरयस्य वासम् ॥३१॥
भूताधिपं वा विबुधाधिपं वा
रमेश्वरं वा परमेश्वरं वा ।
पीताम्बरं वा हरिदम्बरं वा
हरिं हरं वा पुरुषा भजध्वम् ॥३२॥
महस्विवर्यं कमनीयदेह-
मुदारसारं सुखदायिचेष्टम् ।
सर्वेष्टदेवं दुरितापहारं
विष्णुं शिवं वा सततं भजध्वम् ॥३३॥
शिवस्य विष्णोश्च विभात्यभेदो
व्यासादयोऽपीह महर्षयस्ते ।
सर्वज्ञभावं दधतो नितान्तं
वदन्ति चैवं कलयन्ति सन्तः ॥३४॥
महाशया धर्मविधानदक्षा
रक्षापरा निर्जितमानसा ये ।
तेऽपीह विज्ञाः समदर्शिनो वै
शिवस्य विष्णोः कलयन्त्यभेदम् ॥३५॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

हरिरेव हरो हर एव हरि-
नीहि भेदलवोऽपि तयोः प्रथितः ।
इति सिद्धमुनीशयतीशवरा
निगदन्ति सदा विमदाः सुजनाः ॥३६॥
हर एव हरिर्हरिरेव हरो
हरिणा च हरेण च विश्वमिदम् ।
प्रा[illegible]निर्मितमेतदवेहि सदा
विमदो भव तौ भज भावयुतः ॥३७॥
हरिरेव बभूव हरः परमो
हर एव बभूव हरिः सरमः ।
हरिता हरता च तथा मिलिता
रचयत्यखिलं खलु विश्वमिदम् ॥३८॥
वृषध्वजं वा गरुडध्वजं वा
गिरीश्वरं वा भुवनेश्वरं वा ।
पतिं पशूनामथवा यदूनां
कृष्णं शिवं वा विबुधा भजन्ते ॥३९॥
भीमाकृतिं वा रुचिराकृतिं वा
त्रिलोचनं वा समलोचनं वा ।
उमापतिं वाऽथ रमापतिं वा
हरिं हरं वा मुनयो भजन्ते ॥४०॥
हरिः स्वयं वै हरतां प्रयातो
हरस्तु साक्षाद्धरिभावमाप्तः ।
हरिर्हरश्चापि जगज्जनाना-
मुपास्यदेवौ स्त इति प्रसिद्धिः ॥४१॥
हरिर्हि साक्षाद्धर एव सिद्धो
हरो हि साक्षाद्धरिरेव चास्ते ।
हरिर्हरश्च स्वयमेव चैको
द्विरूपतां कार्यवशात् प्रयातः ॥४२॥
हरिर्जगत्पालनकृत्प्रसिद्धो
हरो जगन्नाशकरः परात्मा ।
सुरूपमात्रेण भिदामवाप्तौ
द्वावेकरूपौ स्त इमौ सुरेशौ ॥४३॥
दयानिधानं विलसद्विधानं
देवप्रधानं ननु सावधानम् ।
सानन्दसन्मानसभासमानं
देवं शिवं वा भज केशवं वा ॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

श्रीकौस्तुभाभरणमिन्दुकलावतंसं
कालीविलासिनमथो कमलाविलासम् ।
देवं मुरारिमथवा त्रिपुरारिमीशं
देवं विहाय भज भो भज भूरिभक्त्या ॥४५॥
विष्णुः साक्षाच्छम्भुरेव प्रसिद्धः
शम्भुः साक्षाद्विष्णुरेवास्ति नूनम् ।
नास्ति स्वल्पोऽपीह भेदावकाशः
सिद्धान्तोऽयं सज्जनानां समुक्तः ॥४६॥
शम्भुर्विष्णुश्चैकरूपो द्विमूर्तिः
सत्यं सत्यं गद्यते निश्चितं सत् ।
अस्मिन् मिथ्या संशयं कुर्वते ये
पापाचारास्ते नरा राक्षसाख्याः ॥४७॥
विष्णौ शम्भौ नास्ति भेदावभासः
संख्यावन्तः सन्त एवं वदन्ति ।
अन्तः किञ्चित् संविचिन्त्य स्वयं द्राक्
भेदं त्यक्त्वा तौ भजस्व प्रकामम् ॥४८॥
विष्णोर्भक्ताः शम्भुविद्वेषसक्ताः
शम्भोर्भक्ता विष्णुविद्वेषिणो ये ।
कामक्रोधान्धाः सुमन्दाः सनिन्दा
विन्दन्ति द्राक् ते नरा दुःखजालम् ॥४९॥
विष्णौ शम्भौ भेदबुद्धिं विहाय
भक्त्या युक्ताः सज्जना ये भजन्ते ।
तेषां भाग्यं वक्तुमीशो गुरुर्नो
सत्यं सत्यं वच्म्यहं विद्धि तत्त्वम् ॥५०॥
हरेर्विरोधी च हरस्य भक्तो
हरस्य वैरी च हरेश्च भक्तः ।
साक्षादसौ राक्षस एव नूनं
नास्त्यत्र सन्देहलवोऽपि नूनम् ॥५१॥
शिवं च विष्णुं च विभिन्नदेहं
पश्यन्ति ये मूढधियोऽतिनीचाः ।
ते किं सुसद्भिः सुतरां महद्भिः
सम्भाषणीया पुरुषा भवन्ति ? ॥५२॥
अनेकरूपं विदितैकरूपं
महान्तमुच्चैरतिशान्तचित्तम् ।
दान्तं नितान्तं शुभदं सुकान्तं
विष्णुं शिवं वा भज भूरिभक्त्या ॥५३॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

हरे मुरारे हर हे पुरारे
विष्णो दयालो शिव हे कृपालो ।
दीनं जनं सर्वगुणैर्विहीनं
मां भक्तमार्तं परिपाहि नित्यम् ॥५४॥
हे हे विष्णो शम्भुरूपस्त्वमेव
हे हे शम्भो विष्णुरूपस्त्वमेव ।
सत्यं सर्वे सन्त एवं वदन्तः
संसाराब्धिं ह्यञ्जसा सन्तरन्ति ॥५५॥
विष्णुः शम्भुः शम्भुरेवास्ति विष्णुः
शम्भुर्विष्णुर्विष्णुरेवास्ति शम्भुः ।
शम्भौ विष्णौ चैकरूपत्वमिष्टं
शिष्टा एवं सर्वदा सञ्जपन्ति ॥५६॥
दैवी सम्पद् विद्यते यस्य पुंसः
श्रीमान् सोऽयं सर्वदा भक्तियुक्तः ।
शम्भुं विष्णुं चैकरूपं द्विदेहं
भेदं त्यक्त्वा सम्भजन्मोक्षमेति ॥५७॥
येषां पुंसामासुरीसम्पदास्ते
मृत्योर्ग्रासाः कामलोभाभिभूताः ।
क्रोधेनान्धा बन्धुयुक्ता जनास्ते
शम्भुं विष्णुं भेदबुद्ध्या भजन्ते ॥५८॥
कल्याणकारं सुखदप्रकारं
विनिर्विकारं विहितोपकारम् ।
स्वाकारमीशं नकृतापकारं
शिवं भजध्वं किल केशवं वा ॥५९॥
सच्चित्स्वरूपं करुणासुकूपं
गीर्वाणभूपं वरधर्मयूपम् ।
संसारसारं सुरुचिप्रसारं
देवं हरिं वा भज भो हरं वा ॥६०॥
आनन्दसिन्धुं परदीनबन्धुं
मोहान्धकारस्य निकारहेतुम् ।
सद्धर्मसेतुं रिपुधूमकेतुं
भजस्व विष्णुं शिवमेकबुद्ध्या ॥६१॥
वेदान्तसिद्धान्तमयं दयालुं
सत्याख्यशास्त्रप्रतिपाद्यमानम् ।
न्यायप्रसिद्धं सुतरां समिद्धं
भजस्व विष्णुं शिवमेकबुद्ध्या ॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

पापापहारं रुचिरप्रचारं
कृतोपकारं विलसद्विहारम् ।
सद्धर्मधारं कमनीयदारं
सारं हरिं वा भज भो हरं वा ॥६३॥
हरौ हरे भेदमवेक्षमाणः
प्राणी नितान्तं खलु भ्रान्तचेताः ।
प्रेताधिपस्यैति पुरं दुरन्तं
दुःखं च तत्र प्रथितं प्रयाति ॥६४॥
भो भो जना ज्ञानधना मनाग-
प्यर्च्ये हरौ चापि हरे च नूनम् ।
भेदं परित्यज्य मनो निरुध्य
सुखं भवन्तः खलु तौ भजन्तु ॥६५॥
आनन्दसन्मन्दिरमिन्दुकान्तं
शान्तं नितान्तं भुवनानि पान्तम् ।
भान्तं सुदान्तं विहितासुरान्तं
देवं शिवं वा भज केशवं वा ॥६६॥
हे हे हरे कृष्ण जनार्दनेश
शम्भो शशाङ्काभरणाधिदेव ।
नारायण श्रीश जगत्स्वरूप
मां पाहि नित्यं शरणं प्रपन्नम् ॥६७
विष्णो दयालोऽच्युत शार्ङ्गपाणे
भूतेश शम्भो शिव शर्व नाथ ।
मुकुन्द गोविन्द रमाधिपेश
मां पाहि नित्यं शरणं प्रपन्नम् ॥६८॥
कल्याणकारिन् कमलापते हे
गौरीपते भीम भवेश शर्व ।
गिरीश गौरीप्रिय शूलपाणे
मां पाहि नित्यं शरणं प्रपन्नम् ॥६९॥
हे शर्व हे शङ्कर हे पुरारे
हे कृष्ण हे केशव हे मुरारे ।
हे दीनबन्धो करुणैकसिन्धो
मां पाहि नित्यं शरणं प्रपन्नम् ॥७०॥
हे चन्द्रमौले हरिरूप शम्भो
हे चक्रपाणे शिवरूप विष्णो ।
हे कामशत्रो खलु कामतात
मां पाहि नित्यं भगवन्नमस्ते ॥७१॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

सकललोकपशोकविनाशिनौ
परमरम्यतया प्रविकाशिनौ ।
अघसमूहविदारणकारिणौ
हरिहरौ भज गूढ भिदां त्यज ॥७२
हरिः साक्षाद्धरः प्रोक्तो हरः साक्षाद्धरिः स्मृतः ।
उभयोरन्तरं नास्ति सत्यं सत्यं न संशयः ॥७३॥
यो हरौ च हरे साक्षादेकमूर्तौ द्विधास्थितौ ।
भेदं करोति मूढात्मा स याति नरकं ध्रुवम् ॥७४॥
यस्य बुद्धिर्हरौ चापि हरे भेदं च पश्यति ।
स नरोऽधमतां यातो रोगी भवति मानवः ॥७५॥
यो हरौ च हरे चापि भेदबुद्धिं करोत्यहो ।
तस्मान्मूढतमो लोके नान्यः कश्चन विद्यते ॥७६॥
मुक्तिमिच्छसि चेत्तर्हि भेदं त्यज हरौ हरे ।
अन्यथा जन्मलक्षेषु मुक्तिः खलु सुदुर्लभा ॥७७॥
विष्णोः शिवस्य चाभेदज्ञानान्मुक्तिः प्रजायते ।
इति सद्वेदवाक्यानां सिद्धान्तः प्रतिपादितः ॥७८॥
विष्णुः शिवः शिवो विष्णुरिति ज्ञानं प्रशस्यते ।
एतज्ज्ञानयुतो ज्ञानी नान्यथा ज्ञानमिष्यते ॥७९॥
हरिर्हरो हरश्चापि हरिरस्तीति भावयन् ।
धर्मार्थकाममोक्षाणामधिकारी भवेन्नरः ॥८०॥
हरिं हरं भिन्नरूपं भावयत्यधमो नरः ।
स वर्णसङ्करो नूनं विज्ञेयो भावितात्मभिः ॥८१॥
हरे शम्भो हरे विष्णो शम्भो हर हरे हर ।
इति नित्यं जपञ्जन्तुर्जीवन्मुक्तो हि जायते ॥८२॥
न हरिं च हरं चापि भेदबुद्ध्या विलोकयेत् ।
यदीच्छेदात्मनः क्षेमं बुद्धिमान्कुशलो नरः ॥८३॥
हरे हर दयालो मां पाहि पाहि कृपां कुरु ।
इति सञ्जपनादेव मुक्तिः पाणौ प्रतिष्ठिता ॥८४॥
हरिं हरं द्विधा भिन्नं वस्तुतस्त्वेकरूपकम् ।
प्रणमामि सदा भक्त्या रक्षतां नो महेश्वरौ ॥८५॥

फलश्रुतिः-

इदं हरिहरस्तोत्रं सूक्तं परमदुर्लभम् ।
धर्मार्थकाममोक्षाणां दायकं दिव्यमुत्तमम् ॥८६॥
शिवकेशवयोरैक्य-प्रतिपादकमीडितम् ।
पठेयुः कृतिनः शान्ता दान्ता मोक्षाभिलाषिणः ॥८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

एतस्य पठनात् सर्वाः सिद्धयो वशगास्तथा ।
देवयोर्विष्णुशिवयोर्भक्तिर्भवति भूतिदा ॥८८॥
धर्मार्थी लभते धर्ममर्थार्थी चार्थमश्नुते ।
कामार्थी लभते कामं मोक्षार्थी मोक्षमश्नुते ॥८९॥
दुर्गमे घोरसङ्ग्रामे कानने वधबन्धने ।
कारागारेऽस्य पठनाज्जायते तत्क्षणं सुखी ॥९०॥
वेदे यथा सामवेदो वेदान्तो दर्शने यथा ।
स्मृतौ मनुस्मृतिर्यद्वद् वर्णेषु ब्राह्मणो यथा ॥९१॥
यथाऽऽश्रमेषु संन्यासो यथा देवेषु वासवः ।
यथाश्वत्थः पादपेषु यथा गङ्गा नदीषु च ॥९२॥
पुराणेषु यथा श्रेठं महाभारतमुच्यते ।
यथा सर्वेषु लोकेषु वैकुण्ठः परमोत्तमः ॥९३॥
यथा तीर्थेषु सर्वेषु प्रयागःश्रेष्ठ ईरितः ।
यथा पुरीषु सर्वासु वरा वाराणसी पुरी ॥९४॥
यथा दानेषु सर्वेषु चान्नदानं महत्तमम् ।
यथा सर्वेषु धर्मेषु चाहिंसा परमा स्मृता ॥९५॥
यथा सर्वेषु सौख्येषु भोजनं प्राहुरुत्तमम् ।
तथा स्तोत्रेषु सर्वेषु स्तोत्रमेतत्परात्परम् ॥९६॥
अन्यानि यानि स्तोत्राणि तानि सर्वाणि निश्चितम् ।
अस्य स्तोत्रस्य नो यान्ति षोडशीमपि सत्कलाम् ॥९७॥
भूतप्रेतपिशाचाद्या बालवृद्धग्रहाश्च ये ।
ते सर्वे नाशमायान्ति स्तोत्रस्यास्य प्रभावतः ॥९८॥
यत्रास्य पाठो भवति स्तोत्रस्य महतो ध्रुवम् ।
तत्र साक्षात् सदा लक्ष्मीर्वसत्येव न संशयः ॥९९॥
अस्य स्तोत्रस्य पाठेन विश्वेशौ शिवकेशवौ ।
सर्वान्मनोरथान्पुंसां पूरयेतां न संशयः ॥१००॥
पुण्यं पुण्यं महत्पुण्यं स्तोत्रमेतद्धि दुर्लभम् ।
भो भो मुमुक्षवः सर्वे यूयं पठत सर्वदा ॥१०१॥

इति श्रीहरिहराद्वैतस्तोत्रं सम्पूर्णम् ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ श्रीसरस्वत्यै नमः

शुक्लां ब्रह्मविचार-सारपरमामाद्यां जगद्-व्यापिनीं
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

(घ) अथ श्रीसरस्वतीस्तोत्रम् :-

रविरुद्र-पितामह विष्णुनुतं, हरिचन्दन-कुंकुमपंकयुतम् ।
मुनिवृन्द-गणेन्द्र-समानयुतं तव नौमि सरस्वति पादयुगम् ॥१॥

शशि-शुद्धसुधा-हिमधामयुतं, शरदम्बरविम्ब-समानकरम् ।
बहुरत्न मनोहर-कान्तियुतं तव नौमि सरस्वति पादयुगम् ॥२॥

कनकाब्ज-विभूषित-भूतिभवं, भवभाव-विभाषित-भिन्नपदम् ।
प्रभुचित्त-समाहित-साधुपदं, तव नौमि सरस्वति पादयुगम् ॥३॥

भवसागर-मज्जन-भीतिनुतं, प्रतिपादित सन्ततिकारमिदम् ।
विमलादिक-शुद्धविशुद्धपदं तव नौमि सरस्वति पादयुगम् ॥४॥

मतिहीन-जनाश्रय-पादमिदं सकलागमभाषितभिन्नपदम् ।
परिपूरित विश्वमनेकभवं तव नौमि सरस्वति पादयुगम् ॥५॥

परिपूर्ण-मनोरथ-धामनिधिं परमार्थ-विचार-विवेकविधिम् ।
सुरयोषित-सेवित-पादतलं तव नौमि सरस्वति पादयुगम् ॥६॥

सुरमौलिमणि-द्युतिशुभ्रकरं विषयादि-महाभयवर्णहरम् ।
निजकान्ति-विलेपिन-चन्द्रशिवं तव नौमि सरस्वति पादयुगम् ॥७॥

गुणनैककुलस्थिति-भीतिपदं गुणगौरव-गर्वितसत्यपदम् ।
कमलोदर-कोमल-पादतलं तव नौमि सरस्वति पादयुगम् ॥८॥

वीणा-पुस्तक-रञ्जितहस्ते । भगवति भारति देवि नमस्ते ।
वीणा-पुस्तक-रञ्जितहस्ते । भगवति भारति देवि नमस्ते ॥९॥

त्रिसन्ध्यं यः पठेत् नित्यं भक्तिभावपरायणः ।
जिह्वाग्रे वसते तस्य ब्रह्मरूपा सरस्वती ॥१०॥

इति श्रीसरस्वतीस्तोत्रं सम्पूर्णम्

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

(ङ) श्रीसरस्वतीस्तोत्रम् :-

ॐ अस्य श्री सरस्वती स्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्री सरस्वती देवता, ह्रीं ऐं बीजं, ह्रीं शक्तिः स्वाहा कीलकं मम विद्याकामना-सिद्धये जपे विनियोगः ।

श्रीसरस्वत्यै नमः :

ॐ आरुढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रं
वामे हस्ते च दिव्याम्बरकनकमयं पुस्तकं ज्ञानगम्या ।
सा वीणां वादयन्ती स्वकरकरजपैः शास्त्र-विज्ञान-शब्दैः
क्रीडन्ती द्विव्दरूपा करकमलधरा भारती सुप्रसन्ना ॥१॥
श्वेतपद्मासनादेवी श्वेतगन्धानुलेपना ।
अर्चिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ।
एवं ध्यात्वा सदा देवीं वाञ्छितं लभते नरः ॥२॥
शुक्लां ब्रह्मविचार-सारपरमामाद्यां जगद्-व्यापिनीं
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिक-मालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥३॥
या कुन्देन्दुतुषारहार-धवला या शुभ्रवस्त्रावृता
या वीणा वरदण्ड-मण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकर-प्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥४॥
ह्रीं ह्रीं हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे,
भव्ये भव्यानुकूले कुमतिवनदवे विश्ववन्द्यांघ्रिपद्मे ।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि
प्रोत्फुल्लज्ञानकूटे हरिनिज-दयिते देवि संसार सारे ॥५॥
ऐं ऐं ऐं दृष्टमन्त्रे कमलभवमुखांभोजभूते स्वरूपे
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ।
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे नापि विज्ञानतत्त्वे
विश्वे विश्वान्तरात्मे सुरवरनमिते निष्कले नित्यशुद्धे ॥६॥
ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते
मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् ।
विद्ये वेदान्तवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे
मार्गातीतस्वरूपे भव मम वरदा शारदे शुभ्रहारे ॥७॥
धीं धीं धीं धारणाख्ये धृतिमति-नतिभिर्नामाभिः कीर्तनीये
नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे
मातर्मात्रार्धतत्त्वे मतिमति-मतिदे माधव-प्रीतिमोदे ॥८॥
हूँ हूँ हूँ स्व-स्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते
सन्तुष्टाकारचित्ते स्मितमुखिशुभगे जृम्भिणि स्तम्भविद्ये ।
मोहे मुग्ध-प्रवाहे कुरु मम विमतिध्वान्त-विध्वंसमीडे
गीर्गौर्वाग्भारति त्वं कविवर-रसना-सिद्धिदे सिद्धिसाध्ये ॥९॥
स्तौमि त्वां त्वां च वन्दे मम खलु रसनां नो कदाचित्त्यजेथा :
मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम् ।
मा मे दुःखं कदाचित् क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वम्
शास्त्रे वादे कवित्वे प्रसरतु मम-धीर्मास्तु कुण्ठा कदापि ॥१०॥
इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो,
वाणीं वाचस्पतेरप्यविदितविभवे वाक्पटुर्मृष्टकण्ठः ।
स स्यादिष्टार्थ-लाभैः सुतमिव सततं पाति तं सा च देवी
सौभाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्रयाति ॥११॥
निर्विघ्नं तस्य विद्या प्रभवति सततं चाश्रुतग्रन्थबोधः
कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात् ।
दीर्घायुर्लोकपूज्यः सकलगुणनिधिः सन्ततं राजमान्यो
वाग्देव्याः संप्रसादात् त्रिजगति विजयी जायते सत्सभासु ॥१२॥
ब्रह्मचारी ब्रती मौनी त्रयोदश्यां निरामिषः ।
सारस्वतो जनः पाठात्सकृदिष्टार्थलाभवान् ॥१३॥
पक्षद्वये त्रयोदश्यामेकविंशति-संख्यया ।
अविच्छिन्नं पठेत् धीमान् ध्यात्वा देवीं सरस्वतीम् ॥१४॥
सर्वपाप-विनिर्मुक्तः सुभगो लोकविश्रुतः ।
वाञ्छितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ॥१५॥
ब्रह्मणेति स्वयं प्रोक्तं सरस्वत्याः स्तवं शुभम् ।
प्रयत्नेन पठेन्नित्यं सोऽमृतत्वाय कल्पते ॥१६॥

यदक्षरं-पदं-भ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरी ॥१७॥

इति सरस्वतीस्तोत्रं सम्पूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

(च) श्रीशिवापराधक्षमापनस्तोत्रम् :-

ध्यानम् ॐशान्तं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं
शूलं बज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम् ।
नागं पाशं च घण्टां डमरुकसहितं सांकुशं वामभागे
नानालंकारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥
आदौ कर्मप्रसंगात् कलयति कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये क्कथयति नितरां जाठरो जातवेदाः ।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥१॥
बाल्ये दुःखातिरेकान् मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिता जन्तवो मां तुदन्ति ।
नानारोगादिदुःखाद्रुदन-परवशः शंकरं नः स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥२॥
प्रौढोऽहं यौवनस्थो विषयविषधरैः पंचभिर्मर्मसन्धौ
दष्टो नष्टो विवेकः सुत-धन-युवति-स्वादसौख्ये निषण्णः ।
शैवी-चिन्ता-विहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥३॥
वार्धक्ये चेन्द्रियाणां विगत-गतिमतिश्चाधिदैवादितापैः
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम् ।
मिथ्या-मोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥४॥
नो शक्यं स्मार्तकर्म प्रतिपदगहन-प्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे ।
नास्था धर्मे विचारः श्रवणमननयोः किं निदिध्यासितव्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥५॥
स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं
पूजार्थं वा कदाचित् बहुतरगहनाद् खण्डबिल्वीदलानि ।
नानीता पद्ममाला सरसि विकशिता गन्धपुष्पैः त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥६॥
दुग्धैर्मध्वाज्य-युक्तैर्दधिसित-सहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैर्विविध-रसयुतैर्नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः ।
नो तप्तं गांगतीरे व्रत-जप-नियमै रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥८॥
स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुण्डले सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।
लिंगज्ञे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥९॥
नग्नो निःसंग शुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
उन्मन्यावस्थया त्वां विगतकलिमलं शंकरं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्रीमहादेव शंभो ॥१०॥
चद्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे
सर्पैर्भूषित-कंठकर्णविवरे नेत्रोत्थ-वैश्वानरे ।
दन्तित्वक्कृत-सुन्दराम्वरधरे त्रैलोक्यसारे हरे
मोक्षार्थं कुरुचित्तवृत्ति-मखिलामन्यैस्तु किं कर्मभिः ॥११॥
किं वानेन धनेन वाजि-करिभिः प्राप्तेन राज्येन किं
किं वा पुत्र-कलत्र-मित्र-पशुभिर्देहेन गेहेन किम् ।
ज्ञात्वैतत् क्षणभंगुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्री पार्वतीवल्लभम् ॥१२॥
आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद् भक्षकः ।
लक्ष्मीस्तोयतरंग-भंग-चपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥१३॥
कर चरण कृतं वाक्कायजं कर्मजं वा
श्रवण-नयनजं वा मानसं वापराधम् ।
विहित-मविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥१४॥
इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदा शिवः ॥१५॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

परिशिष्ट खण्ड-२

पञ्चदेवस्तुति र श्रीलक्ष्मीनारायणस्तुति :-

"एकामूर्तिर्न संपूज्या गृहीणा स्वेष्टमिच्छता ।
अनेक मूर्तिसम्पन्नः सर्वान् कामानवाप्नुयात् ॥"

आगमोक्त वचन र "विघ्नराजं शिवां चैव रुद्रं विष्णुं च भास्करम् । पञ्चदैवतमित्युक्तं सर्वकर्मसु प्रार्थयेत् ॥" अनुसार मानवले ५ देवीदेउताको पूजन र भजन गर्नु पर्दछ । निम्न स्थापनक्रम मध्ये एक पंचायतनलाई आधारमानि पूजन गर्नु पर्दछ। सबै देवदेवताको पूजन गर्न नसकिए पनि कमसेकम एकको भजन-प्रार्थना-स्मरण गर्नु पर्दछ।

वैदिक कालदेखि चल्दै आएको सनातन हिन्दू धर्म अनुसार वेद उपनिषद् पुराण सम्मत गाणपत्य, शाक्त, शैव, वैष्णव र सौर्य गरी पाँच सम्प्रदाय चलेका र त्यसमा प्रत्येक सम्प्रदायका प्रमुख देवी-देवताको आधारमा पांचायतन देवीदेवताको स्थापना र पूजन-भजन गर्ने प्रचलन चल्दै आएको, जो अहिले पनि विद्यमान रहेको अवस्थामा यहाँ उक्त सम्प्रदाय परक गणेश, देवी, शिव, विष्णु र सूर्य गरी ५ देवीदेवताको स्थापनक्रम र अन्तमा श्रीलक्ष्मीनारायणको समेत भजन, स्तुति पाठ राखिएका छन् । जो यसप्रकार छन् ।

पंचदेवीदेवता स्थापनक्रम

गणेश पंचायतन	देवी पंचायतन	शिव पंचायतन	विष्णु पंचायतन	सूर्य पंचायतन
विष्णु शिव	विष्णु शिव	विष्णु सूर्य	शिव गणेश	शिव गणेश
गणेश	देवी	शिव	विष्णु	सूर्य
देवी सूर्य	सूर्य गणेश	देवी गणेश	देवी सूर्य	देवी विष्णु

१: संकटनाशन-श्रीगणेशस्तोत्रम् :-

ध्यानम् : ॐ लम्बोदरं परमसुन्दरमेकदन्तं
पीताम्बरं त्रिनयनं परमं पवित्रम् ।
उद्यद्दिवाकरनिभोज्ज्वल कान्तिकान्तं
विघ्नेश्वरं सकलविघ्नहरं नमामि ॥

नारद उवाच :-

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायुःकामार्थ सिद्धये ॥१॥
प्रथमं वक्रतुण्डं च एकादन्तं द्वितीयकम् । तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२॥
लम्वोदरं पञ्चमं च षष्ठं विकटमेव च । सप्तमं विघ्नराजं च धूम्रवर्णं तथाऽष्टमम् ॥३॥
नवमं भालचन्द्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननम् ॥४॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः । न च विघ्नभयं तस्य सर्वसिद्धिकरं परम् ॥५॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ॥६॥
जपेद् गणपतिस्तोत्रं षड्भिर्मासैःफलं लभेत् । संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥७॥
अष्टाभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥८॥

●

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

२: अथ अन्नपूर्णा (देवी-दुर्गा) स्तोत्रम् :-

ध्यानम् : ॐविद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिःकरवालखेट विलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

नित्यान्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥१॥

नानारत्नविचित्रभूषणकरी हेमाम्वराडम्वरी मुक्ताहारविलम्वमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागुरुवासिता रुचिकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥२॥

योगानन्दकरी रिपुक्षयकरी धर्म्मार्थनिष्ठाकरी चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥३॥

कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी कौमारी निगमार्थगोचरकरी ओंकारवीजाक्षरी ।
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥४॥

दृश्यादृश्यप्रभूतवाहनकरी व्रह्माण्डभाण्डोदरी लीलानाटकसूत्रभेदनकारी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥५॥

उर्वी सर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी वेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी ।
सर्वानन्दकरी दृशां शुभकारी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥६॥

आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी काश्मीरा त्रिजलेश्वरी त्रिलहरी नित्याङ्कुरा सर्वरी ।
कामाकांक्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥७॥

देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी वामं स्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥८॥

चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुविम्वाधरी चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ।
माला पुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥९॥

क्षत्रत्राणकरी महाभयहरी माता कृपासागरी साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्वनकरी मातान्नपूर्णेश्वरी ॥१०॥

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे । ज्ञान-वैराग्यसिद्धयर्थं भिक्षां देहि च पार्वती ॥११॥
माता च पार्वती देवी पिता देवो महेश्वरः । बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥१२॥

इति अन्नपूर्णा (देवी-दुर्गा) स्तोत्रं सम्पूर्णम् ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

३: दारिद्र्यदु:खदहनशिवस्तोत्रम् :-

ध्यानम् : ॐमहेशं सुरेशं सुरारार्तिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम् ।
दिरूपाक्षमिन्द्वर्कवह्नि-त्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥

विश्वेश्वराय नरकार्णवतारणाय कर्णामृताय शशिशेखरधारणाय ।
कर्पूरकान्तिधवलाय जटाधराय दारिद्र्यदु:खदहनाय नमः शिवाय ॥१॥

गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधिपकङ्कणाय ।
गङ्गाधराय गजराजविमर्दनाय दारिद्र्यदु:खदहनाय नमः शिवाय ॥२॥

भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्गभवसागरतारणाय ।
ज्योतिर्मयाय गुणनामसुनृत्यकाय दारिद्र्यदु:खदहनाय नमः शिवाय ॥३॥

चर्माम्बराय शवभस्मविलेपनाय भालेक्षणाय मणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय जटाधराय दारिद्र्यदु:खदहनाय नमः शिवाय ॥४॥

पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डिताय ।
आनन्दभूमिवरदाय तमोमयाय दारिद्र्यदु:खदहनाय नमः शिवाय ॥५॥

भानुप्रियाय भवसागरतारणाय कालान्तकाय कमलासनपूजिताय ।
नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्यदु:खदहनाय नमः शिवाय ॥६॥

रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नरकार्णवतारणाय ।
पुण्येषु पुण्यभरिताय सुरार्चिताय दारिद्र्यदु:खदहनाय नमः शिवाय ॥७॥

मुक्तेश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय ।
मातङ्गचर्मवसनाय महेश्वराय दारिद्र्यदु:खदहनाय नमः शिवाय ॥८॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ।
सर्वसम्पत्करं शीघ्रं पुत्रपौत्रादिवर्धनम् ।
त्रिसन्ध्यं यः पठेन्नित्यं स हि स्वर्गमवाप्नुयात् ॥९॥

इति दारिद्र्यदु:खदहनशिवस्तोत्रं सम्पूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

४: ॐ अच्युताष्टकम् :-



ध्यानम् : सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्थल-कौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्र भजे ॥१॥

अच्युतं केशवं सत्याभामाधवं माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं संदधे ॥२॥

विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ।
वल्लभीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३॥

कृष्ण गोविन्द हे रामनारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४॥

राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणम् ।
लक्ष्मणेनान्वितो वानरैःसेवितोऽस्त्यसंपूजितो राघवःपातुमाम् ॥५॥

धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंशहृद्वंशिकावादकः ।
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥६॥

विद्युदुद्योतवान्प्रस्फुरद्वाससं प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥७॥

कुञ्चितैः कुन्तलैर्भ्राज मानाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः ।
हारकेयूरिकं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे ॥८॥

अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृ विश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम् ॥९॥

इति अच्युताष्टकं सम्पूर्णम्

●

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

ॐ श्रीसूर्यनारायणाय नमः

ध्येयः सदा सवितृ-मण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्ट : ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृत-शङ्खचक्र : ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

५: अथ श्रीसूर्य कवचम् :-

ध्यानम् : ॐ प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादिहेतुं
बह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥

श्रीसूर्य उवाच : साम्ब-साम्ब महावाहो श्रृणु मे कवचं शुभम् ।
त्रैलोक्यमङ्गलं नाम कवचं परमद्भुतम् ॥१॥
यज्ज्ञात्वा मन्त्रवित्सम्यक् फलं प्राप्नोति निश्चितम् ।
यद् धृत्वा च महादेवो गणानामधिपोऽभवत् ॥२॥
पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा ।
एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥३॥
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतः ।
श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः ॥४॥
यशआरोग्यमोक्षेषु विनियोगः प्रकीर्तितः ।
प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ॥५॥
सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम् ।
अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः ॥६॥
ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी ।
चन्द्रविम्बंविंशदाद्यं पातु मे गुह्यदेशकम् ॥७॥
अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः ।
शिवोवह्निसमायुक्तो वामाक्षी विन्दुभूषितः ॥८॥
एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्तितः ।
गुह्याद् गुह्यतरोमन्त्रो वाञ्छाचिन्तामणिःस्मृतः ॥९॥
शिर्षादिपादपर्यन्तं सदा पातु मनूत्तमः ।
इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ॥१०॥
श्रीपदं कान्तिदं नित्यं धनारोग्यविवर्धनम् ।
कृष्ठादिरोगशमनं महाव्याधिविनाशनम् ॥११॥
त्रिसंध्यं यः पठेन्नित्यं स रोगी बलवान्भवेत् ।
वहुना किमिहोक्तेन यद्यन्मनसि वर्तते ॥१२॥
तत्तत्सर्वं भवेत्तस्य कवचस्यास्य धारणात् ।
भूतप्रेतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥१३॥
ब्रह्मराक्षसवेताला न द्रष्टुमपि तं क्षमाः ।
दूरादेव पलायन्ते तस्य संकीर्तनादपि ॥१४॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

भूर्जपत्रे समालिख्य रौचनागुरुकुंकुमैः ।
रविवारे च संक्रान्त्यां सप्तम्यां च विशेषः ।१५॥
धारयेत्साधकश्रेष्ठः श्रीसूर्यस्य प्रियो भवेत् ।
त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे करे ॥१६॥
शिखायामथवा कण्ठे सोपि सूर्यो न संशयः ।
इति ते कथितं साम्व त्रैलोक्यमङ्गलाभिधम् ॥१७॥
कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ।
अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् ॥१८॥
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥१९॥

श्री सूर्यस्तवराज

ध्यानम्: ॐ नमः सवित्रे जगदेक चक्षुषे जगत्प्रसूतिः -स्थिति-नाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चि-नारायण-शङ्करात्मने ॥

वशिष्ठ उवाच

स्तुवंस्तत्र ततः साम्बः कृशो धमनि संततः ।
राजन् नामसहस्रेण सहस्रांशुं दिवाकरम् ॥१॥
विद्यमानं तु तं दृष्ट्वा सूर्यः कृष्णात्मजं तदा ।
स्वप्ने तु दर्शन दत्वा पुनर्वचनमब्रवीत् ॥२॥

श्रीसूर्य उवाच

साम्व साम्व महाबाहो श्रृणु जाम्बवतीसुत । अलं नाम सहस्रेण पठंस्त्वेवं स्तवं शुभम् ॥३॥
यानि नामानि गुह्यानि पवित्राणि शुभानि च । तानि ते कीर्तय्यामि श्रुत्वा तमवधारय ॥४॥
ॐविकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः । लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्महेश्वरः ॥५॥
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा । तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥६॥
गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः । एकविंशतिरित्येष स्तवं इष्टः सदा मम ॥७॥
शरीरारोग्यदश्चैव धनवृद्धियशस्करः । स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुत : ॥८॥
य एतेन महाबाहो द्वे संध्ये्ऽस्तमनोदये । स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ॥९॥
कायिकं वाचिकं चापि मानसं यच्च दुष्कृतम् । तत् सर्वमेकजाप्येन प्रणश्यति ममाग्रतः ॥१०॥
एष जप्यश्च होमश्च सन्ध्योपासनमेव च । बलिमंत्रोऽर्घ्यमन्त्रश्च धूपमन्त्रस्तथैव च ॥११॥
अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे । पूजितोऽयं महामन्त्रः सर्वव्याधिहरः शुभः ॥१२॥
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः । आमन्त्र्य कृष्णतनयं तत्रैवान्तरधीयत ॥१३॥
साम्वोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ।
पूतात्मा नीरुजः श्रीमांस्तमाद् रोगाद् विमुक्तवान् ॥१४॥

साम्ब अ.२५, १-१४

इति साम्वपुराणोक्त-श्रीसूर्यस्तवराजः समाप्त :

●

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

६: श्रीलक्ष्मीनारायण स्तोत्रम् :-

अथ श्रीलक्ष्मीस्तोत्रम् :

ध्यानम् :

या सा पद्मासनस्था विपुलकटितटी-पद्मपत्रायताक्षी
गम्भीरावर्तनाभि-स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भै :
सा नित्या पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१॥
नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥२॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥३॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते महादेवि महालक्ष्मि नमोऽस्तु ते ॥४॥
आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ॥५॥
स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥६॥
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥७॥
श्वेताम्बरधरे देवि नानालङ्कारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥८॥
नमस्ते सर्वलोकेशि नमो भक्तजनप्रिये ।
नमस्तेऽस्तु महालक्ष्मि त्राहि मां शरणागतम् ॥९॥
भगवति मम चित्तं पादयोस्तेऽस्तु नित्यं
रमतु नयनयुग्मं दर्शने ते च मूर्त्याः ।
प्रतिभवमभया मे केवला तेऽस्तु भक्तिः
चरण-कमलमध्ये मेऽस्तु नित्यं निवासः ॥१०॥
इमां मया कृतां पूजां यथाशक्त्युपहारकैः ।
त्वमेव पूर्णां तां कर्तुं समर्था देवि मातृवत् ॥११॥

इति श्रीलक्ष्मीस्तोत्रं सम्पूर्णम्

●

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

अथ श्रीनारायण स्तोत्रम् :- ॐ नमो नारायणाय



ध्यानम् : ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

श्री केशवाच्युत मुकुन्द रथाङ्गपाणे गोविन्द माधव जनार्दन दानवारे ।
नारायणामरपते त्रिजगन्निवास जिह्वे जपेति सततं मधुराक्षराणि ॥१॥
श्री देवदेव मधुसूदन शार्ङ्गपाणे दामोदरार्णवनिकेतन कैटभारे ।
विश्वम्भराभरण भूषितभूमिपाल जिह्वे जपेति सततं मधुराक्षराणि ॥२॥
श्री पद्मलोचन गदाधर पद्मनाभ पद्मेश पद्मपदपावन पद्मपाणे ।
पीताम्वराम्वररुचे रुचिरावतार जिह्वे जपेति सततं मधुराक्षराणि ॥३॥
श्रीकान्त कौस्तुभधराऽर्तिहराव्जपाणे विष्णो त्रिविक्रम महीधर धर्मसेतो ।
वैकुण्ठवास वसुधाधिप वासुदेव जिह्वे जपेति सततं मधुराक्षराणि ॥४॥
श्री नारसिंह नरकान्तक कान्तमूर्ते लक्ष्मीपते गरुडवाहन शेषशायिन् ।
केशिप्रणाशन सुकेश किरीटमौले जिह्वे जपेति सततं मधुराक्षराणि ॥५॥
श्रीवत्सलाञ्छन सुरर्षभ शङ्खपाणे कल्पान्तवारिधिविहार हरे मुरारे ।
यज्ञेश यज्ञमय यज्ञभुगादिदेव जिह्वे जपेति सततं मधुराक्षराणि ॥६॥
श्रीराम रावणरिपो रघुवंशकेतो सीतापते दशरथात्मज राजसिंह ।
सुग्रीवमित्र मृगवेधनचापपाणे जिह्वे जपेति सततं मधुराक्षराणि ॥७॥
श्रीकृष्ण वृष्णिवर यादव राधिकेश गोवर्द्धनोद्धरण कंसविनाश शौरे ।
गोपाल वेणुधर पाण्डुसुतैकवन्धो जिह्वे जपेति सततं मधुराक्षराणि ॥८॥
अनेकजन्मजनितं पापराशिविनाशनम् । नमामि विष्णुं विश्वेशं लक्ष्म्या सह सुरोत्तमम् ॥९॥

इति श्रीलक्ष्मीनारायणस्तोत्रं सम्पूर्णम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

परिशिष्ट खण्ड-३

श्री पिण्डेश्वर-संस्कृताध्ययनकेन्द्र-परिचय :-

पठने पाठने वार्तालापे प्रश्ने तथोत्तरे ।
वदन्तु संस्कृतं सर्वे गुरुशिष्या निरन्तरम् ॥

(क) संस्कृत-विद्या-संबर्द्धिनी-समितिको आंशिक परिचय :-

संस्कृत अध्ययन क्षेत्रलाई प्रारम्भदेखि व्यवस्थित गर्ने उद्देश्यले म.सं.वि.का पूर्व शिक्षाध्यक्ष पं. श्री पुरुषोत्तम भट्टराईज्यूको अथक प्रयासमा धरान न.पा. १४ स्थित विजयपुर शीतशैलको उत्तर दिशामा, नारायणपुर नामक स्थानको सिरानमा, पञ्चकन्या भगवती मन्दिरको सान्निध्यमा एक संस्कृत विद्यासंवद्धिनी समिति नामक संस्था २०४१ साल वैशाख २२ गते स्थापित भयो । जसको मान्यता (स्वीकृति) तत्कालीन श्री ५ को सरकारले २०४३ साल श्रावण ३० गते प्रदान गऱ्यो । तब देखि यस संस्था अन्तरगतका शिक्षण संस्थाहरु विधिवत् रूपमा चल्दै पठन पाठनको क्षेत्रमा अगाडि बढी रहेका छन् । यस संस्था अन्तर्गत तीन अध्ययन केन्द्र संचालित छन् ।

१) ऋषिकुल विद्यापीठ नामक गुरुकुल । २) पिण्डेश्वर मा.वि. । र ३) संस्कृत विद्यापीठ ।

१) ऋषिकुल विद्यापीठ नामक गुरुकुल :- यो शिक्षा ऋषिकुलीय प्रणालीमा आधारित शिक्षा हो । यसमा सदाचारी एवं नम्र स्वभावभएका ८ वर्ष भन्दा माथिका साक्षर विद्यार्थीहरुको प्रवेश लिइने गरेको छ । यसमा अध्ययन गर्ने विद्यार्थीको अध्ययन अवधि जम्मा १० वर्षको हुन्छ । तर त्यसको अध्ययन व्यवस्था अहिले प्रचलित व्यवस्था भन्दा भिन्न रहेको छ । १० वर्षे अध्ययन अवधिलाई पनि जम्मा दुई भागमा बाँडिएको छ । पहिलो ४ वर्षे अवधि, दोस्रो ६ वर्षे अवधि । चार वर्षे कोर्षमा- १-अष्टाध्यायी पुस्तक (सम्पूर्ण), २-धातु पाठ, ३-गणपाठ, ४-अमरकोष संम्पूर्ण, ५-तर्क संग्रह, ६-न्यायवोधिनी (सपदकृत्य) मुख्य ग्रन्थको रूपमा रहेका छन्, भने सहायक ग्रन्थमा- १-लघुकौमुदी सम्पूर्ण, २-बेतालपच्चीसि (द्वात्रिंशत् पुत्तलिका) ३-पंचतन्त्र, ४-हितोपदेश आदि ग्रथ रहेका छन् । यसमा अंग्रेजी, तिव्वती र पालीको पनि प्रशिक्षण दिइने गरिन्छ भने संस्कृत तर्फ न्याय, व्याकरण, ज्योतिष, मीमांसाको समेत पठनपाठन हुने गर्दछ । यहाँ उल्लेखनीय कुरो के छ भने उक्त चार वर्षे कोर्षमा पनि प्रतिवर्षको कोर्ष अलग २ निर्धारण गरिएको छ र प्रत्येक वर्ष हुने विद्यालयीय परीक्षामा उक्त प्रणाली अन्तर्गत अध्ययन गर्ने विद्यार्थी उत्तीर्ण हुनै पर्छ । तत् पश्चात् उक्त प्रणालीको दोस्रो वर्षमा प्रवेश दिइने गरेको छ । अनि दोस्रो वर्षको पनि परीक्षा हुन्छ तर त्यसमा पहिलो वर्षको कोर्ष समेत समावेश गरिएको हुन्छ । यसरी नै तेस्रो, चौथो वर्षको परीक्षा समेत हुन्छ र चौथो

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वर्षको परीक्षामा समेत प्रथम, द्वितीय, तृतीय वर्षमा अध्ययन गरी उत्तीर्ण गरिएका पाठ्य-पुस्तकबाट पनि प्रश्न सोधिने गरिन्छ। यसरी चौथो वर्षको परीक्षा दिंदा समेत आफूले अध्ययन गरी पास गरी सकेमा ३ वर्षका पाठ्य-पुस्तकको समेत अध्ययन गर्नुपर्ने हुन्छ।

एवं रीतले उक्त चौथो वर्षको परीक्षामा सम्मिलित १० छात्र मध्ये सर्वोत्कृष्ट नम्बर ल्याई प्रतिवर्ष उत्तीर्ण हुने १ छात्रलाई ऋषिकुल प्रणालीको ६ वर्षे कोर्षमा अध्ययन गराउने गरिन्छ। अन्य नौ छात्रलाई तत्कालीन श्री ५ को सरकार, अहिलेको नेपाल सरकारको मा.वि. तर्फ परीक्षा दिलाउन, संस्थाले पूर्ण सहयोग गर्ने व्यवस्था गरिएको छ।

यसरी उक्त ४ वर्षे कोर्ष अध्ययन गरी सर्वोकृष्ट हुने छात्रको ६ वर्षको अध्ययन कार्य सुचारु रूपले पूरा गराउने र त्यसमा पनि उत्तीर्ण हुने छात्रलाई यस समितिले प्रमाण पत्र दिई त्यसलाई यसै संस्थामा अध्यापनार्थ नियुक्ति दिने तथा त्यसको आजीवन कम्तीमा वर्षको एक लाख सम्मको वेतन संस्थाले दिने योजना गरिएको छ। तर देश काल परिस्थितिको आधारमा त्यसमा केही थपघट हुन सक्ने छ। ऋषिकुल प्रणालीको मूल उद्देश्य-बूँदागत रूपमा निम्न लिखित छन्-

१) अहिलेको प्रचलित प्रणालीमा दोष देखिएकाले आचार, शिष्टता एवं विद्यार्थी कर्तव्यको पालनामा विशेष जोड दिने।
२) विभिन्न प्राच्य विद्यामा रहेका ज्ञान विज्ञानका ग्रन्थ एवं विशिष्ट विद्वान् तैयार पार्ने।
३) प्राच्य विद्यामा आधारित ऋषिकुलीय पद्धतिको विकास गर्ने।

विद्यार्थी प्रवेशार्हता :-

१) यस ऋषिकुलमा पढ्न चाहने छात्रका अभिभावकले यस समितिको सदस्यता अनिवार्य रूपमा लिनुपर्ने हुन्छ। सदस्यता शुल्क १,५१५।- एक हजार पाँच सय पन्द्रह रुपियाँ रहेको छ। जो विद्यार्थीले बीचमा पढ्न छाडेको अवस्थामा पनि फिर्ता हुनेछैन।
२) यसमा पढ्ने विद्यार्थीका अभिभावकको संस्कृतविद्या तर्फ रुचि एवं आस्था हुनुपर्ने हुन्छ। यस विद्या तर्फ रुचि नहुने या नराख्ने अभिभावकका छोराछोरी यस संस्थामा प्रवेशका लागि अयोग्य मानिने छन्।

विद्यार्थी सुविधा :- १-निःशुल्क आवासीय व्यवस्था। २-प्रतिमहिना १५ के.जी. चामल पाउने। ३-निःशुल्क अध्ययन व्यवस्था। ४-बेलाबेलामा विभिन्न धार्मिक, नैतिक सदुपदेशको शिक्षा एवं सनातन धर्मको शिक्षा पाउने व्यवस्था।

विद्यार्थी भर्ना लक्ष्य :- अहिले विद्यार्थी भर्ना लक्ष्य १० ऋषि कुलीय प्रणालीमा रहेका छन्, तर यो संख्या घटबढ हुन सक्तछ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

समितिको स्रोत :- १-विभिन्न स्थानवाट प्राप्त मुष्टिदान एवं प्राप्त सहयोग/रकम। २-सदस्यता शुल्क। ३-बैंकमा रहेको मूलधनको व्याज। ४-समाज सेवी/विद्याप्रेमी समाजद्वारा प्रदत्त चामल सहयोग आदि।

२) पिण्डेश्वर मा.वि.को परिचय :-

२००८ साल मंसिर २७ गते श्री ५ त्रिभुवनवाट पिण्डेश्वर संस्कृत महाविद्यालयको समुद्घाटन गरिसकेपछि श्रीराम संस्कृत पाठशालाको विलय उक्त महाविद्यालयमा नै भएको थियो। तत् पश्चात् पिण्डेश्वर सं. महाविद्यालयमा आन्तरिक रूपमा शिक्षकहरुबीच २ स्तरीय तहगत कार्य विभाजन गरिएको थियो। १-पिण्डेश्वर मा.वि. स्तरीय शिक्षक र २-पिण्डेश्वर महाविद्यालय स्तरीय शिक्षक। पिण्डश्वर मा.वि. स्तरीय शिक्षकले प्रारम्भ देखि कक्षा ८ सम्म पढाउने गर्दथे भने महाविद्यालयीय शिक्षकले प्रारम्भदेखि शास्त्री तहसम्म नै अध्यापन गराउनु पर्ने हुन्थ्यो। दुवै प्रकारका शिक्षकहरुको तलबमा पनि केही भिन्नता थियो। यो क्रम २०२८/२०२९ साल सम्म रह्यो। २०३० सालमा त्रि.वि.को-संस्कृत-अध्ययन-संस्थान अन्तर्गत रहेको संस्कृत महाविद्यालयमा तत्कालीन श्री ५ को सरकारको निर्णय वमोजिम प्रारम्भदेखि शास्त्री तहसम्म अध्यापन गराउने आचार्य या एम.ए. उत्तीर्ण शिक्षकको पिण्डेश्वर संस्कृत विद्यापीठमा नै यथावत् दरवन्दी कायम राखी, अरु केही शास्त्री/आचार्य उत्तीर्ण गरेका भएपनि कक्षा-८ तहसम्म मात्र पढाउने या पढाउन मनपराउने सबै शिक्षकहरुलाई २०२१ साल माघशुक्ल वसन्त पञ्चमीका दिन स्थापित श्री चन्द्र-संस्कृत-विद्यालय, धरानमा समाहित गरियो र पिण्डेश्वर संस्कृत माध्यमिक विद्यालयको त्यसमा विलय भयो। तर उक्त विद्यालयले साङ्गवेदको लक्ष्य अनुरूप कार्य गर्न सकेन र त्यही उद्देश्य पूरा गर्न केही समय पश्चात् उक्त मा.वि.को स्थापना एक अलग रूपमा उक्त संस्कृत विद्या संवर्धिनी समितिको अन्तर्गत रहने गरी २०४३ सालमा पंचकन्या मन्दिर, धरान-१४ को निकटमा भएको हो।

यो मा.वि. राज्यद्वारा अनुमति प्राप्त संस्कृत मा.वि. प्रणाली अन्तर्गत संचालित छ। ऋषिकुल प्रणाली र पिण्डेश्वर मा.वि. दुवै संस्था एउटै स्थानमा संचालित छन्। यहाँ कक्षा ६ देखि १० सम्म पढाउने गरिन्छ। यसमा अनिवार्य विषय लगायत क वर्ग-मूल विषयमा न्याय, व्याकरण, ज्योतिष विषय र व्यावसायिक विषयमा-कर्मकाण्ड या गणित विषय (व्यक्तिगत आयस्रोतको आधारमा) पढाउने गरिन्छ। यसमा पढाउने शिक्षक-संख्या हाल १० जना रहेका छन् जो आंशिक शिक्षकका रूपमा रहेका छन् भने विद्यार्थी संख्या कक्षा ६ देखि १० सम्म ५० रहेका छन्। यो संस्था आफ्नै भवनमा रहेको छ। सामान्यतः कोठा संख्या-२१ छन् भने अन्य भौतिक सुविधामा पानी टंकी-३, शौचालय संख्या-३ वत्ती, टेलिफोन तथा लाइब्रेरी सुविधा समेत अहिले रहेको देखिन्छ। यसका अतिरिक्त विद्यार्थी सुविधा र शर्त उपर्युक्त सबै ऋषिकुलीय शिक्षा प्रणाली अनुसार रहेका देखिन्छन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

३) संस्कृत विद्यापीठको परिचय :- तत्कालीन श्री ५ को सरकारले संस्कृत तर्फ पनि शिक्षा क्षेत्रमा उच्च मा.वि. को विकास गर्दै लैजाने नीति लिएकोले तदनुरूप कार्य गर्दै अगाडी बढ्ने क्रममा २०६२ साल मंसिर महिनादेखि म.सं.वि.एवं २०६२ चैत्रको १९ दिने ऐतिहासिक जनआन्दोलन २ पछिको ने.सं.वि. बाट अहिले उत्तरमध्यमा प्रथमखण्डमा विद्यार्थी भर्ना हेतु संबन्धन प्राप्त गरी दक्ष र शिष्ट विद्यार्थी उत्पादन गर्ने हेतुले यस विद्यापीठको स्थापना यसै विजयपुर स्थित नारायणपुर, धरान १४ मा गरिएको देखिन्छ । यसमा ने.सं.वि.को अध्ययन निर्देशिका अनुसार शिक्षण विषय राखिएका छन् । उक्त निर्देशिकामा उल्लेखित अनिवार्य विषय लगायत कवर्ग- मूल विषयको रूपमा १-न्याय, २-व्याकरण, ३-ज्योतिष, ४-बौद्धदर्शन राखिएको छ भने ऐ.खवर्गमा- गणित विषय राखिएको छ । हाल यो विद्यापीठ आफ्नो भवन नभएकाले उक्त पिण्डेश्वर मा.वि.को भवनमा नै संचालित छ । यसमा २०६३ देखि २०६४ सम्म दुई आर्थिक वर्षका लागि विद्यार्थी भर्ना लक्ष्य क्रमशः २०+२०=४० राखिएको छ । शिक्षक आंशिकरूपमा राखिएका छन् । अन्य सबै शर्त र सुविधा पिण्डेश्वर मा.वि. सरह नै छन् । निकट भविष्यमा नै यस विद्यापीठको आफ्नै अलग भवन हुनेछ र अन्य सबै भौतिक सुविधा पनि हुनेछ भन्ने कुरोमा विश्वास गर्ने अनेक आधारस्रोतहरु देखिएका छन् ।

विद्यार्थी नियम :- यस समिति अन्तर्गतको विद्यापीठमा अध्ययन गर्ने छात्रहरुले पालन गर्नुपर्ने नियम यस प्रकार रहेका छन् । १-सन्ध्योपासना, २-अग्निपरिचर्या, ३-ऋषिकुलीय भेषभूषा, ४-नम्रता, शिष्टता र सद्व्यवहारको पालना र ५-विद्यालयीय नियमको समेत पालना गर्दै अध्ययनमा निरन्तता दिनु पर्ने हुन्छ ।

कलियुगको प्रभाव :-

धर्म : संकुचित : तपो विचलितं सत्यं च दूरं गतं
क्षौणीमन्दफला नृपाश्चकुटिलाः शास्त्रेतरा ब्राह्मणा : ।
लौकास्त्रीवशगा : स्त्रियोतिचपलाऽलोकानुरक्ता जना :
साधु सीदति दुर्जन : प्रभवति प्राय : प्रवृत्ते कलौ ॥ (गृहस्थधर्म)

अर्थात् छलकपट युक्त कलियुगको आगमनको कारण धर्मको मर्यादा संकुचित भयो । तप मार्गबाट व्यक्तिहरुको आस्था हराउँदै गयो । सत्यको अभाव भयो । भूमिमा अन्न कम फल्न थाल्यो । राजाहरु पनि कुटिल हुँदा भए । ब्राह्मणहरु पनि शास्त्रबाट भ्रष्ट (पतित) हुन पुगे । संसारिक प्राणी स्त्रीहरुमा आसक्त हुन थाले । स्त्रीहरु पनि स्वच्छन्द विचरण गर्ने भए । सबै प्राणीले आ-आफ्नो मर्यादाको उल्लङ्घन गर्न थाले । साधु सज्जन व्यक्तिले दुःख पाउँन थाले । दुष्ट (कुटिल) व्यक्तिहरु आनन्दित हुन थाले । यी सबै विषयहरु सत्यको प्रभाव कम भएको र कलिको प्रभाव बढेको कारण मर्यादा विहीन (पथभ्रष्ट) हुन पुगे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

(ख) पिण्डेश्वर विद्यापीठको-संक्षिप्त परिचय :-

भगवान् रुद्रद्वारा संरक्षित, रुद्राक्षारण्य नामले विभूषित यस शीतशैल विजयपुर, धरान-१४ मा संस्कृततर्फको अध्ययन अध्यापनको क्षेत्रमा प्रशंसित पिण्डेश्वर बाबाधामको अति सन्निकटमा रहेको पिण्डेश्वर विद्यापीठ नामक स्नातकोत्तर तहसम्म पढाई हुने महाविद्यालय रहेको छ।

यस विद्यापीठको आफ्नै ऐतिहासिक पृष्ठभूमि रहेको छ। वि.सं. २ हजार सालतिर नेपालमा राणा शासन थियो। राज्यको संचालन उनीहरुद्वारा नै गरिएको थियो। उनीहरु निर्दलीय शासनका पक्षपाती थिए र आफूले भनेअनुसार जनता चलुन् र कुनै प्रकारको विरोध नगरुन् भन्ने उनीहरुको मान्यता रहेको थियो। आफूलाई कुनै कार्यमा व्यस्त राख्न उनीहरुले देवदेवताको मन्दिरको निर्माण गरे, त्यसको संरक्षण एवं संवर्द्धनका निम्ति पनि केही योगदान गरे। त्यतिबेला धार्मिक कट्टरताको धेरै बोलवाला भएकाले अधिकांश सन्त, महन्त एवं बावाहरु धार्मिक भावना तिर ढल्किएका थिए भने कोही सुधारवादी दृष्टिकोण अनुसार चल्न थालेका थिए।

यस्तै धार्मिक भावना अनुरूप धर्मतिर ढल्केका केही आर्थिक दृष्टिकोणले सम्पन्न सन्त, महन्त एवं स्थानीय जनताले मठ मन्दिरको संरक्षणमा ध्यान दिई सेन राजाका पालामा नै गठित विभिन्न गुठीको व्यवस्थित संचालनका निम्ति विभिन्न हण्डि-खानपानको व्यवस्था संवन्धी कार्यको थालनी गरे। यसै परिप्रेक्ष्यमा उनीहरुले देव-देवता, साधु, महात्मा, सन्यासीआदिको संरक्षण, पूजन एवं भोजनादिको व्यवस्था मिलाउन् पर्दछ। यसले पुण्यको भागीदार वनिन्छ भन्ने अभिप्रायले पूर्वाञ्चलको यस धार्मिक क्षेत्र चतरा, रामधुनी पिण्डेश्वरमहादेवको क्षेत्रआदि स्थानहरुमा हण्डी (साधु सन्त तर्फ दिइने भोजन अथवा नगद रकम) को व्यवस्था मिलाये। यसरी पिण्डेश्वर, चतरा र रामधुनीमा गरी दैनिक २७ हण्डीको व्यवस्था र साधुसन्तहरुको निमित्त २७ हण्डीको व्यवस्था तथा अन्य गरीव-गुरुवा आदिको निमित्त पनि २७ गरी कुल १६२ हण्डीको व्यवस्था मिलाए। केही समयसम्म माल कार्यालयबाट गुठीको कार्य सुचारु भयो अनि उक्त गुठीको व्यवस्थापन, केही समय पश्चात् तत्कालीन श्री ५ को सरकारले लियो र सर्वप्रथम २०२१ सालमा "गुठी संस्थान" नामक एक संस्थान स्थापित गऱ्यो र २०३३ सालमा गुठी संस्थान ऐन समेत वन्यो जो क्रमशः २०४१ एवं २०४९ मा संशोधित हुदै अगाडि वढ्दै गयो। अनि त्यसै संस्थानका माध्यमले श्री ५ को सरकारको तर्फबाट गुठीका महन्तमार्फत उक्त हण्डीको व्यवस्था सवैका लागि मिलाइयो। तर यसमा विकृति आउन थाल्यो र यसको दुरूपयोग हुने क्रम वढ्न थाल्यो।

यसै क्रममा २००४ साल भाद्र कृष्णजन्माष्टमीकादिन पं. श्री छविलाल पोखरेलज्यूको सक्रियतामा संस्कृतानुरागी विद्वत्वर्गको सहयोग र उपस्थितिमा धरानस्थित दुई धारेमा श्रीराम संस्कृत पाठशालाको स्थापना भयो। केही समयपछि उक्त पाठशालालाई समेत समावेश गरी (गाभी) २००८ साल मंसिर २७ गते मार्गशीर्ष पूर्णिमा, वुधवारका दिन मध्यान्हको समयमा श्री ५ त्रिभुवन

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

वीरविक्रम शाहदेवको बाहुलीबाट पिण्डेश्वर सं. महाविद्यालयको समुद्घाटन भयो । तत् पश्चात् उक्त श्रीराम सं. पाठशालामा पढ्दै गरेका लगभग ५० जना विद्यार्थीलाई पिण्डेश्वर महाविद्यालयमा नै पढाउने व्यवस्था मिलाइयो । यसरी २००८ सालमा समुद्घाटित उक्त विद्यालयको व्यवस्थापनका निम्ति उक्त गुठीका १६२ हण्डी मध्ये ७५- हण्डी ७५-विद्यार्थीका निम्ति दैनिक व्यवस्था गरियो र उक्त विद्यालयको संचालन गर्न तत्कालिन मोरंगका बडाहाकिम श्री भूपालमान सिंह कार्कीज्यूको अध्यक्षतामा २१ सदस्यीय संचालक समितिको गठन गरियो । तत्कालीन संस्थापक प्राचार्य पं. श्री छविलाल पोखेलज्यू हुनुहुन्थ्यो । हाल उक्त समितिका सवै सदस्यहरु दिवंगत भई सक्नु भएको छ ।

प्रारम्भमा यस विद्यालयमा छात्र संख्या केही कम भएता पनि क्रमश: यो संख्या वढ्दै गयो । यहाँका विद्यार्थीहरु परीक्षा दिन २००९ सालमा वनारसको गभर्नमेन्ट कालेज (क्वीन्स कालेज) मा जाने गर्दथे भने आयुर्वेदको परीक्षा विहार सं. वोर्डमा गई व्यक्तिगत रूपमा दिने गर्दथे । तर त्यसको मान्यता २०१० सालमा मात्र पाए । आयुर्वेदका गुरु "वलभद्र वरालज्यूले" अध्यापन गराउन छाडेपछि आयुर्वेदको पढाई समेत यस महाविद्यालयमा वि.सं.२०१० सालवाट बन्द भयो । तर अन्य पढाई यथावत् रह्यो । प्रारम्भमा साहित्य, व्याकरण मूलविषयका विद्यार्थीहरुको वनारसमा परीक्षा दिन जाने क्रम वि.सं. २०१५ या १६ साल सम्म जारी रह्यो । २०१६ सालमा त्रि.वि.को स्थापना भयो । २०१७ सालमा यस विद्यापीठका छात्रहरुको परीक्षा केन्द्र यसै विद्यापीठमा स्थापना गरिएता पनि उक्त सवै परीक्षा सम्वन्धि व्यवस्था वनारस स्थित गभर्नमेन्ट कालेजले नै हेर्ने गर्दथ्यो । तर २०१८ सालमा त्रि.वि.बाट संवन्धन प्राप्त गरी सकेपछि यहाँका विद्यार्थीको परीक्षा नेपालमा नैं हुन थाल्यो र सम्पूर्ण व्यवस्था त्रि.वि.ले हेर्ने भयो । क्रमश: मूल क वर्गीय विषयहरु पनि थपिदै गए । यसरी नै क्रमश: विभिन्न वि.वि. र विद्यापीठमा २०१९ सालमा ने.प्रा.संघ/संस्था आदिको गठन हुदै गयो र उनीहरुको गतिविधि पनि वढ्दै गयो ।

यहाँ उल्लेखनीय कुरा के छ भने वि.सं. २००८ सालमा श्रीराम संस्कृत पाठशालाको विलय पिण्डेश्वर संस्कृत महाविद्यालयमा भएको र यहाँ क्रमश: प्रारम्भदेखि शास्त्री कक्षासम्म पठनपाठन चल्दै आएको थियो । त्यसमा पढाउने केही अध्यापकहरु प्रारम्भदेखि कक्षा ८ या १० सम्म मात्र पढाउने गर्दथे भने केही प्रारम्भदेखि शास्त्री कक्षासम्म पढाउने गर्दथे । त्यतिवेला अहिलेको जस्तो अधिकतम साप्ताहिक कार्यभार १५ या १२ घण्टी मात्र थिएन । अपितु दिनको ६, ७ घण्टी अहिलेका मा.वि. सरह पढाउनु पर्ने हुन्थ्यो । यसको अतिरिक्त त्यतिवेलाका शास्त्री/आचार्य या वि.ए. पास शिक्षकहरुले ८ या १० कक्षासम्म पढाउने शिक्षकलाई पिण्डेश्वर मा.वि.का शिक्षक र आचार्य कक्षा उत्तीर्ण गरेका तथा शास्त्री सम्म पढाउने शिक्षकलाई पिण्डेश्वर महाविद्यालयका शिक्षकका रूपमा हेर्ने र एक-आपसमा वर्गीकरण समेत गर्ने गरेका थिए । प्रारम्भमा सवै तहका शिक्षकहरुको तलव समान थियो तर उनीहरुमा एक-आपसमा क्रमश: केही असन्तुष्टि वढेकाले केही समयपछि मा.वि. तहसम्म पढाउने शिक्षकको तलव प्रतिमहिना २२५।- रु. दिने गरियो भने स्नातक तहसम्म पढाउने शिक्षकको तलव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

३७५।- रु. बनाइयो । उक्त समयमा उक्त तलबमानले शिक्षकहरुका आ-आफ्नो परिवारको भरण-पोषण केही मात्रामा यथेष्ट हुने गर्दथ्यो । अहिलेको जस्तो महँगी थिएन । २०३० सालदेखि "नयाँशिक्षाप्रणाली" लागू भयो र संस्कृतलाई त्रिभुवन विश्वविद्यालयको संस्कृत-अध्ययन-संस्थान अन्तर्गत राखियो । अनि २०३० सालमा प्रारम्भदेखि कक्षा १० (पूर्वमध्यमा) पर्यन्तका सबै कक्षा २०२१ सालमा स्थापित धरानस्थित- श्री चन्द्र संस्कृत (सांगवेद) विद्यालयमा चल्न थाले भने उ.म. र शास्त्री सम्मका सबै कक्षाहरु पिण्डेश्वर विद्यापीठमा पूर्ववत् नै संचालित हुदै गए । विद्यालयको वर्गीकरण पश्चात् महाविद्यालयीय शिक्षकको तलबमा पनि केही वृद्धि भयो । यो क्रम २०४२ सालसम्म चल्यो । त्यसपछि २०४३ सालमा म.सं.वि.को स्थापना भयो र मूलविषय संस्कृतका अधिकांश सबै विषयका (उ.म. १ देखि आचार्य पर्यन्तका) कक्षा महेन्द्र संस्कृत विश्वविद्यालय हेर्न थाल्यो । प्रत्येक क्याम्पसमा शिक्षण विभागको पनि वृद्धि क्रमशः हुदै गयो । त्रि.वि. संस्कृत-अध्ययन-संस्थान अन्तर्गत लिइने संस्कृत महाविद्यालयका परीक्षा पनि म.सं.वि. ले लिन थाल्यो र यो विद्यापीठ पनि महेन्द्र संस्कृत विश्वविद्यालयको आंगिक क्याम्पसको रूपमा संचालित हुन पुग्यो । यो क्रम २०५१ सालसम्म यथावत् रह्यो । २०५२ सालदेखि साहित्य र नव्य-व्याकरण विषयमा यस विद्यापीठमा थप स्नातकोत्तर कक्षा (आचार्यको) संचालन भयो । यसै क्रममा २०६२ साल चैत्र २४ गते रामनवमीदेखि २०६३ साल वैशाख १० गते १९ दिनसम्म चलेको ऐतिहासिक जनआन्दोलन २ को बलमा यस नेपाल अधिराज्यको सार्वभौमसत्ता नेपाली जनतामा स्थापित भयो र यस विश्वविद्यालयको नाम नेपाल संस्कृत विश्वविद्यालय भयो । एवं अधिकांश सबै विश्वविद्यालयका कुलपति पनि प्रधानमन्त्री हुने व्यवस्था भयो । अहिले उ.म. प्रथम खण्डदेखि आचार्य पर्यन्तको अध्ययन-अध्यापन यस विद्यापीठमा भई रहेको छ ।

यसरी यस विद्यापीठमा ने.सं.वि. निर्देशिकामा उल्लेखित अनिवार्य विषय सहित मूल 'क' वर्गीय विषयहरुमा- शु.यजुर्वेद, ज्योतिष (फलित), धर्मशास्त्र, साहित्य, नव्य-व्याकरण, प्राचीन-न्याय रहेका छन् भने 'ख' वर्गीय ऐच्छिक विषयहरुमा-नेपाली, अंग्रेजी, राजनीतिशास्त्र, अर्थशास्त्र विषयहरु शास्त्री तहसम्म रहेका छन् । आचार्य तहमा साहित्य र नव्य-व्याकरण विषयहरु रहेका छन् ।

म.सं.वि., अहिलेको नेपाल संस्कृत विश्वविद्यालय (नेपाल सरकार) बाट पूर्ण आर्थिक रूपले व्यहोरिएको यस विद्यापीठमा पढ्ने विद्यार्थीहरुले २००८ सालदेखि सुविधाको रूपमा पाउदै आएको, वि.सं. २०३१ साल पश्चात् गुठीबाट प्राप्त हण्डीको व्यवस्थापनमा केही असन्तुष्टि बढेको र अव्यवस्था समेत उत्पन्न भएकोले छात्रहरुलाई भोजन वृत्तिको स्थानमा छात्रवृत्ति दिइयो । क्रमशः छात्रवृत्ति पनि बढ्दै गयो । यस्तै केही दशक पश्चात्, तत्कालीन म.सं.वि.बाट उत्तरमध्यमा देखि शास्त्रीतहसम्म अध्ययन गरे बापत प्रतिमहिना विश्वविद्यालयीय नियमानुसार छात्रले ४५०।- रु. छात्रवृत्ति प्राप्त गर्न थाले भने आचार्य तहका विद्यार्थीले प्रतिमहिना प्रत्येक खण्डका लागि ५००।- रु. छात्रवृत्ति प्राप्त गर्ने भए । यसको अतिरिक्त महिला विद्यार्थीले उ.म.देखि आचार्य तहसम्म साविक भन्दा १००।- रु. प्रतिमहिना थपछात्रवृत्ति पाउदै आएका छन् । अनुसूचितजाति, जनजातिका

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: M

छात्रछात्राले प्रोत्साहन स्वरूप उ.म. देखि आचार्य तहसम्म कुनै पनि तहमा नियमानुसार अध्ययनगरे वापत प्रति विद्यार्थी १०००।- एक हजार रु. छात्रवृत्ति पाउने गरेका छन् । यो छात्रवृत्ति प्रत्येक खण्डमा, एक वर्षका लागि बढीमा १० महिनाको दिइने गरेको छ । यो क्रम अहिले पनि चालू छ ।

यसै क्रममा यस विद्यापीठमा क-साहित्य एवं अनिवार्य संस्कृत विभाग, ख-राजनीति एवं अर्थशास्त्र विभाग, ग-व्याकरण एवं धर्मशास्त्र विभाग, घ-नेपाली एवं अंग्रेजी विभाग, ङ -वेद ज्योतिष एवं न्याय विभाग गरी जम्मा ५ शिक्षण विभाग क्रियाशील छन् । कहिलेकाँही शिक्षण विभागको सक्रियतामा यस विद्यापीठमा कार्यपत्रहरु समेत प्रस्तुत हुने गर्दछन् । जसमा साहित्य एवं अनिवार्य संस्कृत विभागबाट २०६१ साल वैशाख ३१ गते प्रस्तुत- "विद्यार्थीजीवन र केही विसंगतिहरु" र २०६३ साल जेठ ११ गते प्रस्तुत- "रुद्राक्षमाहात्म्य एवं उपचारविधि" तथा "अलंकार शिक्षणविधि" नामक कार्यपत्र उल्लेख्य छन् ।

विद्यापीठको भौतिक संपत्तिको रूपमा २ तले पक्की छुटै शिक्षण भवन, प्रशासकीय २ तले भवन, पुरानो छात्रावास, नयाँ छात्रावास, अध्यापक-कर्मचारी-आवास, प्रशासकीय भवनको दक्षिणतर्फ तत्कालीन म.सं.वि.बाट प्राप्त विकास बजेटबाट खर्च गर्ने गरी २ तले शिक्षण भवनको निर्माणका लागि ५७ लाख रु. को योजना यस विद्यापीठबाट प्रस्तुत भएको र उक्त विश्वविद्यालयबाट क्रमशः प्राप्त केही रकम मध्ये २०६० देखि २०६२ सालसम्मको निर्माणमा अहिले सम्म लगभग १८ लाख रु. खर्च भईसकेको छ भने प्रस्तुत योजना रकमको निरन्तरता भएमा उक्त भवन निर्माणको लक्ष्य पूरा हुने देखिन्छ । यसै क्रममा नेपाल भारत मैत्रीको रूपमा २०६३ सालमा नेपालस्थित भारतीय राजदूतावास मार्फत भारत सरकारको कुल सहयोग रकम ५७,५७,८६५।- रु. मध्ये ३८,५०,३९१।- रु. मा जि.वि.स. सुनसरीको र यस विद्यापीठको समेत सक्रिय रेखदेखमा २ तले पक्की महाकवि कालिदास पुस्तकालय भवन यसै विद्यापीठको परिसरमा निर्माण भई समुद्घाटन हुने अवस्थामा पुगी सकेको छ भने पुरानो शिक्षण भवनमा अहिलेपनि एक बृहद् पुस्तकालय रहेको छ । अन्य आधारभूत सुविधा सबै यहाँ प्राप्त छन् । यसमा अध्ययन गर्ने छात्र-छात्राहरुको संख्या लगभग २ सय रहेको छ भने प्राध्यापकहरुको संख्या ३३ र कर्मचारी संख्या २१ रहेको छ । विभिन्न आँप, कटहर, सिसौं, टिक एवं रुद्राक्षका वृक्षले सुशोभित यस विद्यापीठको जग्गा लगभग १८,१३,८ विगाहा रहेको छ ।

यसको अतिरिक्त साधारण मा.वि. बाट एस.एंल.सी. परीक्षा उत्तीर्ण गरेका तथा संस्कृततर्फ पढ्न चाहने विद्यार्थीहरुलाई यस विश्वविद्यालयमा अध्ययनार्थ प्रवेश दिलाउनका निमित्त यस विद्यापीठमा ६ महिने संस्कृत भाषा प्रशिक्षण, वेलावेलामा कर्मकाण्ड प्रशिक्षण, योग प्रशिक्षण आदि विषयहरुको अध्यापन/प्रशिक्षण कार्य समेत हुने गरेको छ । अन्य संभावनाहरुमा कम्प्यूटर, आयुर्वेद, गणित एवं पुराण-इतिहासआदि विषयहरु हुनसक्तछन् । जसको विस्तृत विवरण यस विद्यापीठको प्रशासन र परीक्षाशाखाबाट प्राप्त गर्न सकिने छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

ॐ रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः ॥



ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदल-स्पर्धिनेत्रं प्रसन्नम्।
वामाङ्कारूढसीता-मुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding. M

(ग) श्री रामचन्द्रस्तुति :-

ध्यानम् :- ॐ रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥

श्री रामचन्द्र कृपाल भजुमन हरण भव भय दारुणम् ।
नवकंज लोचन कञ्ज मुख कर कञ्ज पद कंजारुणम् ॥
कंदर्प अगनित अमित छवि नव नील नीरद सुन्दरम् ।
पटपीत मानहु तडित रुचि शुचि नौमि जनक सुतावरम् ॥
भजु दीनबन्धु दिनेश दानव दैत्यवंश निकंदनम् ।
रघुनन्द आनन्द कन्द कोशल चन्द दशरथ नन्दनम् ॥
सिर मुकुट कुण्डल तिलक चारु उदार अङ्ग विभूषणम् ।
आजानु भुज शर-चाप धर संग्रामजित खर दूषणम् ॥
इति वदति तुलसीदास शंकर शेष मुनिमन रञ्जनम् ।
मम हृदयकञ्ज निवास करु कामादि खलदल गञ्जनम् ॥
मन जाहि राच्यो मिलहिं सो वर सहज सुन्दर साँवरो ।
करुणा निधान सुजान शील सनेह जानत रावरो ॥
इहि भांति गौरी अशीश सुनि सिय सहित हिय हर्षित अली ।
तुलसी भवानी पूजि पुनि पुनि मुदित मन मन्दिर चली ॥
जानि गौरी अनुकूल, सिय हिय हर्ष न जात कही ।
मंजुल मंगल मूल, बाम अङ्ग फरकन लगे ॥

सियावर रामचन्द्रकी जय ।

●

श्रीरामोक्ति :- "शिवद्रोही मम भगत कहावा । सो नर सपनेहु मोहि न पावा ॥"
रामचरितमानस अनुसार-जुन व्यक्तिले शिवसँग द्रोह-वैरभाव राख्दछ त्यसले सपनामा पनि मलाई पाउँन सक्दैन ।

गृहस्थाश्रमको विशेषता :-

सानन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी
सन्मित्रं सुधनं स्वयोषितरति-श्चाज्ञापराः सेवकाः ।
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥

●

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

(घ) मननयोग्य केही कुराहरु :-

सूर्यं सम्पूजयेन्नित्यं सावित्रीं च जपेत् तथा ।
सूर्यार्घ्यं सन्ध्ययोर्दद्यात् नमस्कुर्याच्च भास्करम् ॥
गणनाथ-सरस्वती-रवि-शुक्र-वृहस्पतीन् ।
पञ्चैतान् संस्मरेन्नित्यं वेदवाणीं प्रवर्तते ॥
प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥
ब्राह्मणः प्रणवं कुर्याद् आदावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति ॥
वेदे रामायणे चैव पुराणेषु च भारते ।
आदि-मध्यावसानेषु हरिः सर्वत्र गीयते ॥
अभ्यसेद् प्रयतो वेदं महायज्ञांश्च भावयेत् ।
कुर्याद् गृह्याणि कर्माणि संध्योपासनमेव च ॥
येनास्य पितरो याता येन याताः पितामहाः ।
तेन यातात् सतां मार्गं तेन गच्छन्नरिष्यति ॥
धर्मस्थायतनं यत्नाच्छरीरं प्रतिपालयेत् ।
न च देहं विना रुद्रो शिद्यते पुरुषैः परः ॥
न देवगुरुविप्राणां दीयमानन्तु वारयेत् ।
न चात्मानं प्रशंसेद्वा परिनिन्दां च वर्जयेत् ॥
इदमेव हि पाण्डित्यं चातुर्यमिदमेव हि ।
इदमेव सुबुद्धित्वमायादल्पतरो व्ययः ॥
उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम् ।
मौनेन कलहो नास्ति नास्ति जागरतो भयम् ॥
को हि भारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सुविद्यानां कः परः प्रियबादिनाम् ॥
मात्रा स्वस्रा दुहित्रा वा नो विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥
विद्या विवादाय धनं मदाय शक्तिः परेषां परपीडनाय ।
खलस्य साधो विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ॥
रे रे चातक सावधानमनसा मित्रं क्षणं श्रूयताम्
अम्भोदा वहवो वसन्ति गगने सर्वेऽपि नैतादृशा : ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

संकलन- सूर्याङ्क र गृहस्थधर्मबाट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

0. In Public Domain. Digitization by eGangotri.Funding: M

अन्तिम खण्ड

सन्दर्भ-ग्रन्थ-सूची

१. शिव महापुराण (रुद्र संहिता)
२. लिगाचन[illegible]त्र पटल
३. स्वच्छन्दतन्त्र
४. वृहद्पुरश्चर्यार्णव
५. शिव पुराण
६. स्कन्द पुराण
७. लिंग पुराण
८. मातृकाभेदतन्त्र
९. वामन पुराण
१०. निर्णय सिन्धु
११. धर्म सिन्धु
१२. आन्हिक सूत्रावली
१३. शिव महापुराण (विश्वेश्वर संहिता)
१४. शिव महापुराण (ईशान संहिता)
१५. श्री शिवमहिम्नस्तोत्रम्
१६. मेरुतन्त्र
१७. शाक्त प्रमोद
१८. रुद्र पद्धति
१९. कैवल्योपनिषद्
२०. वायु पुराण
२१. सत्कर्मरत्नावली
२२. पाणिनीय शिक्षा
२३. याज्ञवल्क्य शिक्षा
२४. रुद्र-नमक-भाष्य
२५. श्रीमद् भागवत महापुराण
२६. आचारग्रन्थ
२७. रुद्राक्षारण्य माहात्म्य-योगी नरहरिनाथ
२८. रुद्राक्षजावालोपनिषद्
२९. श्रीमद् देवी भागवत महापुराण
३०. चमत्कारी तन्त्र साधना
३१. नेपाली वृहत् शब्दकोष-ने.प्र.प्र. काठमाडौं
३२. संस्कृत नेपाली वृहत् शब्दकोष (म.सं.वि. दाङ)
३३. चरक संहिता
३४. सुश्रुत संहिता
३५. धन्वन्तरी राजनिघण्टु
३६. द्रव्य गुणविज्ञान
३७. शिवस्तोत्ररत्नाकर
३८. श्री अतिहरिहरयागमाहात्म्यम्
३९. औषधपूर्ण चन्द्रोदय
४०. देशको माटो देशको ढुंगा (भाग २)
४१. वृहद् रुद्राक्ष माहात्म्य
४२. रुद्राक्षमाहात्म्य एवं धारणविधि
४३. रुद्राक्ष शक्तिके रहस्य
४४. रुद्राक्ष शक्तिके चमत्कार
४५. रुद्राष्टाध्यायी
४६. ऋतम्भरा पत्रिका-म.स.वि.दाङ
४७. शुक्ल यजुर्वेद संहिता
४८. नित्यकर्म पूजा प्रकाश
४९ रुद्राक्षारण्य माहात्म्यम्-पथिक कवि
५०. अभिज्ञानशाकुन्तलम्
५१. विष्णु पुराण
५२. रघुवंशमहाकाव्यम्
५३. कल्याण का विभिन्न अंक/ विशेषांक आदि
५४. गुठी संस्थान विवरणिका-२०५६
५५. पद्मपुराण-माघमाहात्म्य
५६. प्रभा-पिण्डेश्वर स्वर्णमहोत्सव अंक
५७. विभिन्न विद्वान्‌हरुका सम-सामयिक लेख एवं पत्र-पत्रिकामा प्रकाशित रचनाहरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

In Public Domain. Digitization by eGangotri.Funding:

फोटो नं.१



फोटो नं.२

१) वि.पी.कोइराला स्वास्थ्य विज्ञान प्रतिष्ठान घोपा, धरानको वहिरङ्ग विभाग ।
२) वि.पी.कोइराला स्वास्थ्य विज्ञान प्रतिष्ठान घोपा, धरानको कार्यालय भवन ।

epal Sanskrit University, Balmeeki Campus, Kathman

0. In Public Domain. Digitization by eGangotri.Funding: ...



फोटो नं.१

फोटो नं.२

ग ।
वन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

परिचय :

लेखक

नाम : डा. भरतप्रसाद भट्टराई

पद : सह प्राध्यापक, ने.सं.वि. नेपाल

कार्यरत : पिण्डेश्वर विद्यापीठ, धरान-१४

जन्मतिथि : १०/१०/१९५९ ई.सं.

शिक्षा : आचार्य (साहित्य), एम.ए. (मनोविज्ञान) विद्यावारिधि: (पीएच. डी.), योग डिप्लोमा एवं वेदसेतु

अध्ययन संस्था :

i. सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

ii. काशी हिन्दू विश्वविद्यालय (B.H.U.), वाराणसी

अध्यापन अनुभव : २३ वर्षदेखि निरन्तर

पुरस्कार/पदक :

i. उत्तर प्रदेश संस्कृत अकादमी, लखनऊ (भारत) बाट वेद पण्डित पुरस्कारद्वारा पुरस्कृत

ii. महेन्द्र विद्याभूषण 'क' पदकद्वारा सम्मानित

प्रकाशित लेख : प्रभा, मर्यादा, ऋतम्भरा, उन्नयन र नेपाल-लगायत विभिन्न पत्र पत्रिकामा प्रकाशित अनेक अनुसन्धानमूलक लेख एवं रचनाहरु

प्रकाशित कृति : श्रीपिण्डेश्वर-पूजनपद्धति

प्रकाशोन्मुख कृतिहरु :

सनातनका केही कोपिलाहरु

स्वप्न दर्शन

संस्कृतसाहित्य परिचय :

रसस्वरूप विमर्श :

Nepal Sanskrit University, Balmeeki Campus, Kathmandu